नं० ३२२

वि

विद्यारण्यतन्त्र

पत्राणि १३०

नं० ३२२—ख

१३० पत्राणि

नं० ३२२६

विद्याविवाहनाटक

१३ पत्राणि

संपूर्ण

श्लो०

आनंदराम

शर्मा ।

श्लो०

१३२०

विद्यापरिणयनारंभस्य ।

श्रीश्रीकृदेवशरशाक्रियपाभिलष्यस्य

तदनुकृवाक्षरस्यापि न विघ्नसेवेत्यलं ।

६	१	८
७	५	३
२	९	

विद्यापरि०

श्रीगणेशायनमः॥ सत्यज्ञानसुखाद्वयोपि बहुधारूपाणि बिभ्र

वैभव

च्चिराद् प्रज्ञय विलासैर्विभ्रमैर्निजाविद्या विधेयीकृतः॥ आनं

द्रान्विषयोदितानन्नुभवन्भूयः स्वया विद्यया प्रभ्रिष्टः परमा

र्थभोगमुदितः पायाद्रुमायाः पतिः॥ क्रीडोद्यान निकुंजसीमनि

किंच

सखीचातुर्यतो मिश्रयोरुत्कूलप्रणयोदितसरभसाश्लेषमि 1

थः प्रस्कृते॥ संमोहस्मितासमग्रपुलकाविस्त्रस्तवेद्यांतरावृत्तिः

साशिवयोरपारपरमानंदाशिवायास्तुवः ॥ अपिच ॥ सज्जंतोम्र
गारत्नस्लिकाजलनिधौमुक्ताज्जिघृक्षारसाद्धूंध्यापत्यकलादृभुक्तिर
ज्ञताकल्पेषुसंकल्पिनः ॥ व्यावल्गंत्यविमर्शिनोयइवधिज्योतिःप
रंज्योतिषांतत्सेतुर्जगतोखिलस्यतमसःपारंपरंभातुवः ॥ अपि
च ॥ प्राग्जन्मीयतपःफलंतनुभृताप्राप्येतमानुष्यकंतच्चप्राप्तव
ताकिमन्यदुचितंप्राप्तुंत्रिवर्गंविना ॥ तत्राप्तिश्चययाभवेत्फलव

तीविश्वोत्तरांशाश्वतीनामद्वैतकलांकलानिधिकलामोक्तिर्विधत्तांशि
वः॥ ॥नांद्यंतेसूत्रधारः॥नेपथ्याभिमुखमवलोक्य॥मारिषइतस्ता
वत्॥प्रविश्यपारिपार्श्विकः॥२॥भावएषोस्मि॥सू॥अत्रतंजानग
रेदेशांतरादागताःपौरजानपदाजनाभगवत्यास्तावदानंदवल्लभ्यांबा
यामहोत्सवदिदृक्षयासंघीभूताः॥सरसकवितानाम्लोहेमन्तःकृषे
पल्लतांगताःविहरणाभुवःषड्दर्शन्याविवेकधनाकराः॥विदध २

(३)

त्ति तपोलभ्याः सभ्याः इमे मम कौतुकं तदिह हृदयं नाद्य नैतानुपासितु
मीहते ॥ पा ॥ कं पुनः प्रबंधमवलंब्य ॥ सू ॥ नन्वस्ति मम वशो सकल
शामधनजनहृदयानंदसमुद्घाटकं विद्यापरिणयनं नाम नवीनं
नाटकं ॥ पा ॥ कस्तस्य प्रबंधस्य कविः ॥ सू ॥ विद्वत्क विकल्पतरुरा
नंदरायमखी ॥ य एषः ॥ गुरुदेवद्विजभक्तो नैमित्तिकनित्यकाम्यक
र्मपरः ॥ दीनजनाधीनहृदयो विहरति समरे च विक्रमार्क इव ॥ यस्य द्वि 3

ल॥ आनंदरायमखिनो वाल्मीकेरिव योगिनः॥ इतरापेक्षणात्सारः स्वतः
सारस्वतोदयः॥ अपि च॥ नानापूर्वमहाक्रतुप्रणयनैरध्यात्मसंमर्शो
3 नैः कर्मब्रह्मपथप्रचारसविता षड्दर्शनीवल्लभः॥ त्रातो यस्य किलैक
राजवसुधाधौरंधरीगीष्पतिः क्षोणीपालकिरीटलालितपदः ख्यातो
न्नसिंहाध्वरी॥ अपि च॥ यस्य तातानुजन्मापि यशःपावितदिङ्मुखः॥ 3
त्रिवर्गफलसंपन्नस्त्र्यंबकामात्यदीक्षितः॥ किंच॥ यस्मात्तो जनिदि

व्यसिंधुसलिलेयःस्वात्मविद्याभिज्ञोयेनाकारिसहस्त्ररश्मिणामखोयः
सद्भिराश्रीयते॥सोयंत्र्यंबकराययज्वतिलकोविद्वत्कवीनांप्रभोर्ये
त्तातस्यनरसिंहरायमखिनस्तुल्यप्रभावोनुजः॥सतावदिदंनाट ४
कमुचितेषुप्रयोक्तव्यमितिसबहुमानमस्मद्धस्तेसमर्पितवान्
अनेनसुकरमभिरूपपरिषदनुरंजनमितिममाध्यवसायः॥पा
भाव॥अपूर्वमप्राकृतसंविधानमुद्घुष्यतेनाटकमेतदत्र॥रसानु

न तदागमांतप्रमेयसर्वस्वमिहेति

भ्मतेरविळंबहेतोर्निरूप्यतां किंचिदिवेतिवृत्तं॥स्त्र॥युक्तमभिहितं॥
अयतोनावत्॥यल्लाभतोवल्लभमस्तिनान्यत् आत्मासशेषीसकलाग
मानां॥येनाधिगम्यैनिगमांतशास्त्रप्रमेयतत्वंनहिहेतिवृत्तं॥पारि॥
भावरूसमिअप्रभृतिभिरत्रप्रबोधचंद्रोदयइतिसंकल्पसूर्योदयइ
तिभावनापुरुषोत्तमइतिचान्यबंधिनामबहुधाप्राचीनैः॥किमनेना
भिनवसंरंभेण॥सू॥क्षुण्णायद्यपिशास्त्रपद्धतिरसावन्यैःकवींद्रैरयं

(६)

त्वशीलं न तितिक्षते तेन सहते पात्रे ष्ठुचानौचितिं ॥ नेतुः शास्त्रमतां त्रिव गु
र्गफलसंपत्तिं विमुच्यात्ययोपन्यासं च जुंप्सनेत द्वयमारंभोस्य संरंभ
तः॥ पारि॥ अद्वैतं वस्तु शृंगारो रसः॥ अथ च नि र्दोषतेति सर्वमिद
मद्भुतं दृश्यते॥ अथवा॥॥ विश्वातिशायिलो किकवैदिकलक्ष्मीविला ६
सव्यतिकरे राजगद्दाश्चर्यकुलपरंपरा नामतएते॥ एतत्प्रणीतम
भिनवमिदं नाटकमस्माभिरभिनीयत इति वाङ्मनसातिवर्तिननु

५

॥म०र०भा० विद्यापरि०

भाग्यमिदमस्माकं॥ परंतु श्रुतिस्मृतीतिहासागमतंत्रादिसिद्धनानावि
धसांबशिवचरणपरिचरणतदनुसंधाननिरंतररितनिखिलवास
रस्यतदंतरालपरिमितपरिशिष्टकतिपयमुहूर्तेनिर्वर्तनीयचतुर
दधिपरिमुद्रितसकलराज्यतंत्रस्यशरभमहाराजमंत्रिशिखामणे
रस्यजनकसनकसनंदनप्रमुखाभिनंदनतदीदशामहाप्रबलनिबं
धनपरिमधौरंधरीयमितिमेमहदाश्चर्यं॥ सूत्र॥ किमुच्यतेमहदाश्च 5

(6)

6

येमिति॥ आबाल्यादपि पोषितो जननिमया प्रेम्णा तथा लालितस्तेनासौ
सरसामुपैतु कविता मानंदरायाध्वरी॥ इत्येकक्षितिपालवंशजलधेर्द
व्या गिरां ज्ञातया धीरश्रीशरभावनींद्रवपुषानूनं प्रसादः कृतः॥ अतः (6)
किमसाध्यमेतस्य॥ तत्प्रणीतमिदं नाटकमिह प्रयुंजानः तदनुगुणस
कलगुणरमणीयानत्रभवतः सामाजिकानुपतिष्ठे॥ सामाजिकान्प्रति
किंचिदिव कर्णं दत्वा किं ब्रूथ॥ अप्राकृतसभाहृद्यानप्राकृतगिरामताः॥

अतः संस्कृतया वाचा सभालंक्रियतामिति ॥ साधुसम्यगभिहितं ॥ तथै
वप्रतिपात्रमाहितो यत्नः ॥ नेपथ्याभिमुखमवलोक्य ॥ आर्ये इतस्ताव
6 त् ॥ प्रविश्य नटी ॥ आर्य इयमस्मि ॥ सू ॥ आर्ये यावदस्मदीयवर्ग्योऽव
र्णिकापरिग्रहणाय सन्नह्यंति तावदिमं पुष्पसमयमधिकृत्य गीयतां
संप्रति हि ॥ सोत्कंपस्तबकस्तनं दरचलत् बालप्रवालाधरं गायत्को ६
किलपालितानघटनारज्यन्मिलिंदव्रजं ॥ मंदं मंदसमीरदेशिकसमा

(५)

देशादिनो मंजरी वामामिल्व मिवाभिनंदयन टनापुष्पाति ह ष्टोमुदं ॥ नदी ॥
तथेति गायति ॥ मुदिताक्षि गीति शोभित मुग्धन वीन प्रसून शोभनया ॥
कथा मल्लिकाया सह कारं घटयंति विलासिनो महोत्साहाः ॥ नेपथ्ये ॥ साधु भर
तकुलांगने साधु ॥ सम्यग भिहितं भवत्या ॥ प्रस्तुतानुगुण वचन भंगी
भिरभिनंदनीयासि ॥ सत्य महमिदानीं विघयासह परमेश्वरस्य प्र
तिबिंबभूतं जीवराजं संघटयितुमेव विरचितोत्साहा भवामि ॥ सू ॥ अ

५
(८)

त्वासहर्ष॥ अयेमत्स्यालकोरंगनाथनामाशिवभक्तेर्भूमिकामादायआ
गतएव॥ यदधुना॥ तुर्णोचंदनचुंबिफालफलकस्पष्टत्रिपुंड्रोज्वलाद्वि
ग्ग्राणापरिपाकपिंगकलमच्छायंमेजटामंडलं॥ कोटीरांगदहारकंकण
पदेरुद्राक्षमालावतीभस्मोद्धूलनपांडराभगवतीभक्तिःपुरस्तादियं॥
तद्यावामप्यनंतरकरणीयायसज्जीभवाव इतिनिष्क्रांतौ॥ ॥प्रस्ताव
ना॥ ॥ततःप्रविशतिशिवभक्तिः॥२॥ आदिष्टास्मिपरमकारुणिक्या

परमेश्वर्यो॥यथा॥सुचिरमयम विद्यातु र्विलासेंद्रजालैः प्रभुरिव मग
त स्तावारिप्रे र्विमूढः॥विलुठतिरवलुजीवो विस्मृतस्वीय भूमा कथम
सिशिव भक्ते वत्सलात्वं पराची॥इति तदनुभूतं भाविभवद्विमभ्यस
४ कलं जीवस्य दुःखं चिरादस्योत्तारणकारिणः कृतिपैयोपायास्त्वयोद्भावि बतो
ताः॥इष्टापूर्तपुरोगमाः सनिगमामंत्राः सतंत्रा इमे सत्येवं जगदं बमद्वि
रहितं हीयेत किं साधनं॥किंच॥नामैव नालमिह किं युवयोर्जनस्य संसा

रघोरविषसागरतारणाय॥ प्रायोभवन्ममतयाकलितःस एषलोकेषुमाममपिप
द्दार्थयितुंप्रयत्नः॥इतिमयासविनयमभिहितेभगवतीसस्मितमवोचत॥वत्से
मैवंवादीः॥कर्माणिसंतुविविधानिकरोतुतानिक्लिष्टश्चिरेणतपसानियमैश्च
घोरैः॥त्वत्सन्निधानविरहेतुभवंतितानिपांचालिकाभिनयवत्फलवंचि
तानि॥अतः॥जनिप्रभृतिपङ्कणेशबरताविमूढोयथाविनीयनपनंदनोन्
पतिकन्ययायोज्यते॥तथैननमितरम्नमाकुलमितोमहादुर्गहाद्विमोच्यनि
जविघ्ययाघटयितुंयतेथाइति॥विचिंत्य॥ननुतद्दैवपरमैश्वर्याभिहितं

८

अत्र नवसहकृत्वरी निवृत्तिरनुपदमेव मयाप्रेष्यतइतितत्किमद्यापि निवृ
त्तिश्चिरयति ।। पुरो विलोक्य ।। सपरितोषं ।। भस्मालेपनतः शरज्जलधरच्छा ४
१ यां तनुं बिभ्रती पक्ष्मभ्यामधरश्रियाच कथमप्युल्लेयवक्त्रांबुजा ।। वैयाघ्रं
परिधायचर्मदधती सव्यानमैणीत्वचं विद्युत्पिंगजटाच्छटा विजयते (६)
सेयं निवृत्तिः पुरः ।। ततः प्रविशति निवृत्तिः ।। ४ ।। अंब शिव भक्ते प्रणमा
मि ।। शिव ।। वत्से प्रकाशतां ते परंज्योतिः ।। निवृत्तिः ।। भगावतिसंदिष्टास्मि

परमेश्वर्यो॥ वत्सेमहतिकार्यविशेषेमयानियुक्तायाःशिवभक्तेरभिहि
1 तकरणायप्रत्यनंतरीभवेति॥ तदद्यक्तो नियोगोमयिभगावत्याः॥ शिवभ।
वत्सेनिवृत्तेकथंचिदस्यजीवराजस्यसुमहतःसंकटाद्विमोचनेविद्यासंयोजने
चविधेयोयत्नः॥ निवृ॥ किमेतावदेतस्यसमापतितं॥ शिव॥ किमितो
पिसमापतितव्यंदेवस्य॥ श्रुणुतावत्॥ व्यामोहादसतीविलासजनिता 9
दासादितोलाघवंनिश्शंकंपरितोबलादविरतंकामादिभिःकर्षणात्॥ हृष्य

न्जानुरुद्दन्क्षणेनविहसन्भयो विषीदन्मनागिथ्थंहंत परःपुमान्स मह
तीनीचांदशामश्नुते॥ निव॥सखेदं॥ आश्चर्यमिदं॥ अप्रधष्यस्य महात्मनो
देवस्यडुस्संगदोषेणकियतीविपत्तिरुदपद्यत॥ शिव॥ किमेतावद्देव॥ अ
यतामग्रेपि॥ व्यामुग्धस्तरुगुल्मघासजननैःखेदान्कृतिप्रापितःभूय:
कीटपतंगपन्नगमृगीभावैःकियत्क्लेशितः॥ दिष्ट्यामानुषपौरुषादि
विधयापारंस्पृशन्वर्तते भूयोनीचपथेपतेद्यदिकथंदेवीतितिष्ठेततत्॥

निवृत्तिः॥भगवतिपारस्पर्शनमस्य किंनाम॥शिवभ॥श्रृणुतावत्॥श
श्वत्सिंधुतरंगवत् बहुजनुःसंपन्नधर्मोच्चयैःवर्णःस्वर्णवदस्य भाति बहु
धासंस्कारसंयोगतः॥अष्टावात्मगुणाश्चसन्निदधते मैत्र्यादिभिर्भूषिताने
दिष्टोनरसिंहएषमहितःकैवल्यलभ्यान्वि किं॥इदमेवतत्॥अतोयमेवा
वसरःप्रयत्नस्य॥परमेश्वर्यापितदिदमभिसंधायैवसंप्रतिवयमत्रस ११
त्वरं नियोजिताः॥निवृत्तिः॥भगवतिजीवराजस्यतादृग विद्याविघटनविद्या

संघटनविषयेपरमेश्वर्योःकिन्निबंधनोयमियानभिनिवेशः॥ शिव॥ वत्सेजी
वोनामकिमितरःपरमेश्वराभ्यां॥ शृणुतर्हिकथयामितेभक्तार्थे॥ सत्यज्ञानसु
खस्वरूपमभितःसर्वांतरात्मेतियोविख्यातःपुरुषःसतावदसतींपश्यन्नवि
द्यामिमां॥ अस्याविभ्रममोहितःप्रमुषितस्वीयप्रभावंप्रथांजीवोजीवद
त्यप्रपद्यसुचिरादुन्मत्तवद्भ्राम्यति॥ किंच॥ विद्यानामपरानसापिपरमा
चिच्छक्तिरेवात्मनःसास्मिन्नीदृशिगार्हयेवविमुखीस्वेनात्मनावर्तते॥ यो

मातापितरौसमस्तजगतामाद्यौशिवौतौचतौरूपंनामचभिद्यतेथसमयेष्वे
तेमिथोनेतरे ॥ तथाचपरमेश्वरीस्वजनसंकटविषयेकथमुदासीन ॥ नि
वृत्तिः ॥ उपपन्नमेवैतत् ॥ तदेवंप्रवृत्तस्यकार्यस्यनिर्वर्तनेकापुनरितिक
र्तव्यता ॥ तदत्रनिपुणतरमेकमुपायमवधारयतुभगवती ॥ शिव ॥ आ
त्म ॥ अतिचिरादविद्यासंसाररसैकलंपटस्यजीवराजस्यविषयदोषोद्भा 11
वनादिभिरभिमुखीकरणमतिनिम्नगामिनोमहतःप्रवाहस्यप्रतीपनमि

वद्दुर्घटमेव॥ परंतु वासनानुगुणतया किंचिदपूर्वरमणीमणिपरिणायन
प्रणाडिकयैव विद्यासंघटनमुपपादनीयं॥ प्रका॥ आश्चिंतितो मयात दभि
मुखीकरणोपायः॥ निव॥ कथमिव॥ शिव॥ कर्णएवमिव॥ निव॥ साधु
चिंतितं भगवत्या॥ शिव॥ संप्रति हि जीवराजमविद्याविषयवासनाप्र
वृत्तिभ्यां निरंतरमुपरुध्य निश्शंकमकुतोभयमखिलेषु विषयेषु क्रिड
मते॥ तदविलंबितमभिमतसिद्धये व्याप्रियस्व॥ मयापि तत्तदुपसर्ग

विघटनायप्रवृत्तकार्यघटनायचतत्रतत्रव्याप्रियते ॥ इतिनिष्क्रांते ॥ ॥
विष्कंभः ॥ ततःप्रविशति चित्तशर्मणानर्मसचिवेनसपरिवारयाचावि
द्ययाजीवराजः ॥ जीवः ॥ देवींप्रति ॥ प्रियेनववनवोल्लासरमणीयैर्भवद्भिर
तिचमत्कारैरतिहिनामप्रीणितोममायमंतरात्मा ॥ कापुमांतुपुमांसमेवम
परासंकल्पलेशोद्भवंनानाकारसमस्तभोग्यभरितादेनंदिनैरुत्सवैः ॥ भर्तं 12
भाविचवाकुहापिकिमिदंयधित्वयोद्भाव्यतेनैषादृष्टचरीनवाश्रुतचरीत्व

(१४)

म्बानुरी वैरवरी॥ देवी॥ स प्रश्रयं॥ यत्किंचित्प्रभवाम्यहं कृतिषु तत्सर्वं भव
द्वैभवं कर्तुं भर्तुमथापहर्तुमपि वा काहं वराकी जडा॥ तत्सर्वं भवतो विभ
तिकणिकायद्धन्मयोद्भावितं मामेषोपगता किलेति ममतास्नेहाद्दभि ष्टौषि
मां॥ प्रद्यु॥ अयि भद्दे निरुक्तिरिति किमसदर्थोपन्यासः क्रियते॥ नन्वयं भ
वत्या॥ इत्याकर्मपथे विचित्र निभवे वृध्धिं समभ्यंस कं वैरिंचं पदमेतदैन्द्र
मिद मित्युच्चैः पदं प्रापितः॥ स्वर्वामा धरमाधुरीषु मुदितः प्रेरंवन्मणीमेखला

(१३)

जाल्लोत्ताळसल्लंग्रस्नातिसुभगान्भोगान्कलिप्रापितः॥ देवि॥ सखिप्रवृत्तेभ
वत्सामयिप्रणयविजृंभितमेवैतत्॥ वत्सकृतस्त्रभवद्दायत्तमेवेदं॥ तथाहि
क्रीडाकांचनशैलकूटघटितप्रत्युप्तनानामणिज्योतिःकर्बुरसौधसीमसुक
नत्कल्पद्रुपुष्पास्तरे॥ उद्दामस्मरदर्पविभ्रमवतीसंभोगभृंगारिणोय
क्रीडंतिविलासिनस्त्वदखिलंलीलायितंतेनकिं॥ चित्त॥ स्वग॥ हंततदे
वमासामन्योन्यप्रशंसाभिनंदनाभिनिवेशेनतन्मयइवजायतेवयस्यः

तद्दयमेवावसरो विवेकाहीनमपि प्रतिस्कृतार्थोपक्षेपस्यतदेवमभिधास्ये
प्रका॥ सोमर्षी। अत्र तेन किमिस्येवपरिणतो सर्वमिदं भवेत्॥ विषय॥
सामर्ष॥ अयेनिपुणः खलु भवानुचितोपचारैः स्वामिपादपरिचरणेषु
देवीप्रति॥ तेन किमित्यस्मदनुज्ञाविते षुनीरसत्वमापादयिता राजहिते
षिणा मुनामहामंत्रिणा चित्तशर्मणा एवंघुरधि निशीधिनि विनोद
नव्याजेन देवपाद विषये कश्चिन्महाननुपचारः कृतः॥ स्वधर्मः किलायम

स्येति तद्देवेन तितिक्षितं ॥ देवी ॥ तत्कथमिव ॥ विष ॥ शार्दूलभ्वसृगालम
र्कटमहारक्षस्तरक्ष्वात्मनाघोरोद्घोषयामंधकारिणि वनेखादन्निवाभ्या
गतः ॥ देवी ॥ स्वप्नस्य तद्धीनतया ऽ तस्य सर्वोपि वेषः संगच्छत एव ॥ त
तस्ततः ॥ विषय ॥ तद्दृष्ट्वा भयतो विसंस्थुलपदं धावन् द्रुमान्पर्वतानारो
हन्निपतन्निवाकुलतरो दृष्ट्वा प्रबुद्धो विभुः ॥ जीवः ॥ प्रियसख्यमेतत्
आकस्मिकतया बहुपर्याकुलोस्म्यनेन ॥ देवी ॥ सस्मितं ॥ उचितमेवक

(१५)

तं॥ भवितव्यं खलु तद्देवकीभावस्य फलभोगेन॥ चित्त॥ स्वग॥ यथा कथं
चिद्वयमभिभावनीय इति धर्तया विषयवासनायाहृदयं॥ प्र॥ अयि
कुम्भलेय दसाधु तदेव मम मच्चेष्टितमुद्गावयसि॥ यदभिनंदन मिदं
तु न प्रतिपादयसि॥ यत्किल॥ त्वंगत्तुंग तुरंग कोटिविनटन्माघत्पदा
तिघ्रणात् घंटाजाल झणंझणहृदत तिक्षीबद्विपञ्चेणि च॥ स्वत्वानेक
पुरीश्रियासुरपुरीरेतास्त्वयं वैभवैरानीता मणिमंटपेन तु मयासिंहा १५

सनेध्यासितः॥जीवः॥इदमप्यस्येव॥तदेवमपर्वार्थप्रपंचनविधान
यमेवसमर्थः॥प्रव॥आभासमात्रमिदमखिलमपिकस्मिन्कोणे
वाभट्टिन्याःप्रभावमहिमातिशायस्य॥उद्यानानिमहावनानिगिरयः
प्रासादसौधादयःप्राकाररक्षसचक्रवालशिखरीरवेयंतुसप्तार्णवी॥
आशास्तोरणगोपुराणिदशतास्तेजस्त्रयीदीपिकायस्याःशिल्पमियं
पुरीवसुमतीसाकेनवावर्ण्यतां॥विष॥सखिप्रक्ते किमत्यल्पमेवाह

हृतं॥इत्थंकतिजगंतिजयंतिकतिवारानमूनिगतानिकतिचवारानुत्पादि
तानिभद्दिन्या॥चित्त॥सोस्माशं॥अयेसस्यमाभासमात्राण्येवमहार ध्या
नि॥यतःप्रातिभासिकानि॥युष्मदुद्भाविताानितुपारमार्थिकानिस्थिरा
णिसुखानिदेवस्य॥अवि॥हंतप्रणयिनःसमक्षमेव ममर्माणितोदः (१६)
कृतोवैधयेन॥विष॥अरेतत्वंनजानासि॥सुखमस्त्वसुखंवास्तुनै
वसाधुनिरंतरं॥यथाविरहिणीकांतेरमतेकिंतथापरा॥देवी॥अयेच

पलस्वभावोयमस्थिरप्रायइतिनन्ववगतमेवैतत्॥ चित्त॥ सोन्याश्रं
हेवभ्रम्यतां॥ एतास्तावदहंपतार्यकरणद्वाराणिबध्वाहृदंनिर्व्यापार
18 तयापुरीतदुद्दरेगद्रढंनिलीयस्थितः॥ दुःखासंकलितंनयाम्यनुपदहंनोचे
द्भवंतंसुखं॥ कृत्वारोगासहस्त्रगुंभनमिमाःकिंवाविहधुर्नते॥ अपि
च॥ इयंकिलकदाचिदाश्रितमुत्कर्षतिकदाचिदपकर्षतिकदाचिद १६
भिनंदयति॥ तत्त्वहिलक्षणगुणभिन्नाःप्रकृतयस्तावदस्यादुर्वाराः॥ प्र

व॥धिङ्मूर्ख॥कुलमहत्तरामपि भट्टिनीमभिभवन्नूजाड्यमेव प्रकाश
यसि॥चित्त॥अयेजाड्यं चापलं मौर्ख्यमन्यद्वाय त्किंचिद्विलसितं तद
खिलमपि युष्मदीयमेव॥किन्न प्रसरेयुः सविज्ञीगुणास्तत्र सवेषु
अविद्या॥सखेदं॥आत्म॥केन किमुपदिष्टं वा यथा पुरमयमस्मासु 17
न वर्तते चित्तशर्मा॥राजा॥स्मितं कृत्वा॥अयमेसर्वे धात्र्ययमेतत्कल
हेन निर्विण्णो निवृत्तुमुखइव दृश्यते॥ततः प्रविशति संकल्पो दौवारि

कः॥२॥ देवतापसी काचन सशिष्या प्रतिहारभुवमागता देवपादं दिदृक्षते॥ राजा॥ सादरं॥ प्रवेश्यतां॥ ततः प्रविशति तापसीवेषा सशिष्या निवृत्तिः॥२॥ अये शांते तत्रभवत्याशिवभक्त्याहमेवंकिलाभिहितास्मि॥ वत्से निवृत्ते मायागहनकर्मणश्छिन्नशर्मणो भेदनेनैव जीवराजोभिमुखीकरणीय इति॥ हंत परमार्थाविसंवादी भवति महात्मनामध्यवसायः॥ तथा हि॥ प्रवृत्तिरिति विषयवासनेति च यैतावदिमे

सां प्रतमविद्यासाम्राज्यसर्वस्वनिर्वाहिके प्रथिते ॥ एतयोस्तावदंधयोरिवचित्तन्य
र्मावलंबमंतरेण क्रियानपिन प्रचारः ॥ अस्मिंस्तु तनोभेदं गमिते तदन्ववायः
सर्वोपि शिथिलितप्रायः ॥ तदिदमभिसंधायैव तद्भेदनाय भगवत्याशिव
भक्त्या प्रथमत एव विवेकादयः प्रहिताः ॥ पुरो विलोक्य ॥ स एष जीव
स्तेन चित्तशर्मणा सह सल्लपन्नित आस्ते ॥ यावदेनमुपसर्पामि ॥ उपस (18)
र्पति ॥ जीवः ॥ निर्वर्ण्य ॥ इयं सा ॥ गाढोन्नध्दजटाकलापकपिलश्रीधृतबा

लातपाविम्भ्राणाभसितानुलेपधवलछायांतनुंपावनी॥भिक्षापात्रमयू
रपिंछचयभृत्पाणिद्वयामेधुनाकाषायांबरधारिणीकलयतिस्वांतेध
तिंतापसी॥उपसृत्यप्रणामति॥निवृ॥सांद्रानंदघनोभूयाः॥जीवः॥भग
वतिइतआस्यतामित्यासनंनिर्द्दिशति॥निवृ॥उपविशति॥राजा॥कः
प्रदेशोलंक्रियते॥तत्रभवत्या॥कानिचभुवनपावनान्यभिधानाक्षरा
णि॥किमुद्दिश्यकश्चायमिहागमइतिविविदिषामि॥निवृत्तिः॥वत्सश्र

यतां॥ दर्पणावदभिमुखानां दर्शयद्धात्मस्वरूपमखिलानां॥ विस्मयशेव
धिरास्तेवेहारण्याभिधं शिवक्षेत्रं॥ तस्मिन्निष्टफलद्रुमाः कतितैःशाखा
ग्रातैरुच्छ्रिताः हृद्योपासनवल्लुरीकवचितास्तत्रप्रदेशाःकति॥ तेषांमूल
फलादिमानिकतिवातत्सर्वेमास्तामहोतत्रत्यामतमाधुरीनपरतःकुत्रा (१६)
पिसत्यंब्रुवे॥ तत्रास्तेशिवभक्तिरित्यनुपमातत्वार्थसंदर्शनीतत्संदर्शि
तसंप्रदायसरणिस्तस्यास्तुशिष्यास्म्यहं॥ विज्ञानप्रभवांनिवृत्तिरिति

मामाचक्षते योगिनीधर्मिष्ठस्य दिदृक्षयात्तव मनागत्राहमभ्यागता ॥ रा
ज्ञा ॥ परमनुगृहीतास्मि निरुपाधिकेन वात्सल्येन ॥ किमस्माद्दशामपित
त्रप्रवेशः स्यात् ॥ निवृत्तिः ॥ परमकारणि क्याः सकलपुमर्थप्रसविन्याः
शिवभक्तेः प्रसादाद्देवसुकरस्तत्रप्रवेशः ॥ तस्यां प्रसीदंत्यामेव तत्रस्याः
शमदमादयो विधेया भवंति ॥ विधेयेषु च तेषूपनिषद्देव्याः परिचये
नमहत्तरं श्रेयो भवेत् ॥ राज्ञा ॥ विष्णुभक्तिरिति हि तत्र तत्र श्रूयते ॥ शि

वभक्तिरिति॥किममुष्यानामांतरं॥निव॥अथकिं॥शृणुतावत्॥वि
ष्णुर्नशिवादन्यःशिवशक्तेःसखलुपौरुषंरूपं॥शक्तिश्चनातिरिक्ताश
क्तिमतोतःशिवात्परंनान्यत्॥राजा॥सोत्कंठं॥भगवतिकीदृशंतत् (20)
महत्तरंश्रेयः॥निव॥कर्णे॥एवमिव॥राजा॥सहर्षोल्लासं॥अप।
अपिनामजातुममैतदुपपद्येत॥चित्त॥वयस्यमहानुभावायास्तव
स्यानिवृत्तेरनुग्रहादेवतदिदंश्रेयोलभ्यते॥अवि॥साशंकं॥ननममी

षामियच्चिरोपनतेन॥ कुटिलेंगितेनसल्लापेनमत्प्रतीपेन भवितव्यं॥
भवतुविमृश्यप्रतिविधास्यामि॥ नेपथ्ये॥ वैतालिकौ॥ रोमंथालसले
२० चनावनमृगीनिद्रातिमूलेतरोरंभस्तप्तमपास्यमीननिवहःपंकाविलं
गाहते॥ धावंधावमितस्ततोमरुज्वलेतापाभिभूतःकरीसोत्कंठंकल
हंसिकाकलरवैर्व्यावर्ततेपद्मिनी॥ अपरः॥ तापत्रस्तइवाधुनाबहिरि २०
तोनस्पंदतेमारुतःप्राणायामवशेनयोगिनइवस्तब्धाइमेपादपाः॥ छा

यापश्चिमदिक्प्रवृत्तिविततापक्षीयमाणाशनैरेषाह्यभ्युदयाचलश्रिय
मितोज्ञातानिवृसुन्मुखी।।चित्त।।सहर्षं।।वयस्यतदिदंवैतालिकवचन
मेवनिदर्शनंमदभिहितार्थे।।राजा।।सानंदमभ्युपगच्छति।।अविद्या।
देवमध्यान्हसमयोतिवर्तते।।तन्माध्यंदिननियमनिर्वर्तनायविसृ
ज्यतांतापसी।।देवेनापिमाध्यंदिननियमानिर्वर्त्यंतां।।अहमपितदु
पकरणानिसन्निधापयामीतिनिष्क्रांताःसर्वे।। ।।प्रथमोंकः।। ।।ततः

प्रविशतिप्रवृत्तिरसूयाच ॥ असूया ॥ प्रवृ ॥ ततस्ततःप्रागेव चित्तशर्मणा
सह रहसिकृतिपयेतापसाःसल्लपितवंतइतिचेटीमुखादेवकर्ण्यसंहृ
हृतरकिंतातहनुसमक्षमेववकर्णेकिमपिरहस्यमभिधायराज्ञानमतिप
र्युत्सिकितवत्साकयाचैतापस्याचनितांतसंक्षोभितहृदयाप्रियसखीभ
र्तृनीमामेवमवोचत ॥ वेदारण्यनिकेतनाःश्रमदमप्रष्ठामहायोगिनः 21
अयंतेकृतिचिन्निवृत्तिरितिचरव्यातातथातापसी ॥ तेसर्वेशिवभक्ति

मार्गनिरतायेतावदज्ञागतास्तन्नामानइमेपरे किमथवासाक्षात्तइत्याम
शेः॥यदिखलुतदितरएतेयत्किंचिदिदंततोनभेतव्यं॥अथयदित
एवतेस्पुर्यल्लोमयानिहप्रतीकारे॥अतस्तदिहम विचिकित्समामभ्य
स्समागछेति॥तदनुकथंचिद्द्वारण्यमधिगम्यकेनकुत्रनिषद्यतेकःकि
माचरतिकथमिदमवगछेयमितिचिंतातरङ्कितायांमपियदछयातत्र
कामनासंप्राप्ता॥तदनुतयाविविच्यसकलमभिहितं॥अस्मत्कामपु

२२

रोगमैःसममितःकाम्यक्रियोपासनाऽभ्युद्धास्तेपरतःशमप्रभृतयस्तेमन्व
तेसांप्रतं॥राजाऽभ्युद्धतरःकिलैषतदिमंव्याकृष्यदुस्संगतोनीचादृस्पमहा
त्मनःसुसदृशीहृद्यामविद्यामिति॥तदेवमविद्याकुलविघटनायविर
क्तिनिवृत्तिभ्यांसहविवेकशमदमादिबहुलपरिवाराशिवभक्तिरत्रप्रभ
वतीति॥त्वंपुनःक्वप्रस्थितासि॥असूया॥भर्तृन्याहमेवंसंदिष्टास्मि॥ २१
यथा॥असूयेकाम्यक्रियोपासनाःसमेत्यब्रूहि॥कदाचिदयंतत्रराजाय.

दिसमागच्छेत्तदासयथा भक्तिविरक्तिनिवृत्तिप्रभृतिभिर्नाक्रम्येत ॥ तथा
युष्मदीयविलासचातुर्यरमणीयकैरेववशीकरणीयइति ॥ तदिहको
मार्गः किंमुखमिति बुभुत्सातरङ्गिता ॥ दिष्ट्यात दत्रभवत्योपगता विदि
तकरणीयास्मि ॥ तत्साधयामि ॥ इदमपिस्थानएवसंविधानमवध्य प्रवृत्तिः ॥
करणीयंच ॥ अयानतीतः कालः ॥ इयताहिकालेनचित्रशालाभ्यंतरे
विषयवासनयासहमहिनीचिरेणममामार्गंप्रतीक्ष्यनिर्विद्येत ॥ तद्

हमविलंबितमेवतत्सकाशंगच्छामि॥त्वयापियथानियोगमाचर्यतामि
तिपरिक्रम्यनिष्क्रांते॥प्रवेशकः॥ततःप्रविशतिविषयवासनयासाव
मविद्या॥२॥सखिविषयवासनेभवत्सहायापिनन्वहमीदृशींदशा
मुपगतास्मि॥विष॥किमेतावतीमयिभर्तृन्याःप्रतिपत्तिः॥अवि॥कि
मल्पप्रभावाभवती॥तथाहि॥शास्त्राणिसंतुसुबहूनिपठंतुतानिसर्वं 23
त्वमन्यथयसेनिजवैभवेन॥दृष्टस्त्वयाविवलतेविषयेषुनामबद्धो

वलीमुखइवाशरणोवुधोपि॥ विष॥ भद्दिनिकिमेतावद्दद्यतेसंप्राप्तं॥ अति॥ अणुतावत्॥ अग्रेभ्रद्दयमेकएवनपुनःकश्चिद्दितीयोभवत्ताहक्षस्यमयैवमित्रतनयाःसंबंधिनोबांधवाः॥ किंभ्रयःकथनेनभोगविषयालोकाइमेलंभिताःसोयंमय्यधुनाविभातिविमुखः केनेतिनज्ञायते॥ किंच॥ किंदैवंपरिपंथिवाममकयाकिंबाधितंवाम्नषातादृक्क्ष्मतरंगितोतिसरसःस्वामीसजीवोधुना॥ मामालोक

यतेऽन्नानि वक्तन. भुक्षप्रवृत्या दृशा किंरूपेण मनोहरेण बहुना भोग्येन

24 भाग्येन वा ॥ न केवलमस्य विमुखतैव मांव्यथयन्ति ॥ अपितु तदनुमीय

मानाविमतनायिकासक्तिसंभावनापि ॥ विष ॥ सोन्प्राशं ॥ ननु ते विदि

तास्म कलैरघटितघटनापटीयसी शक्तिः ॥ अहमपि ते सध्रीची कथम

स्थाने विशंकते भवती ॥ सम्यक्प्रवृत्तिरुपलभ्यतां ॥ अवि ॥ स्मृतिमभि

नीय ॥ प्रागेव शंकित विषयो हृंत विमर्शनापप्रहिता प्रवृत्तिः ॥ किमद्यापि २८

नागता ॥ ततः प्रविशन्ति प्रवक्तिः ॥ २ ॥ कथमत्रैव विषयवासनया सह भद्र
पीठमध्यास्ते देवी ॥ येषा ॥ पश्यंस्त्येव न पश्यति प्रणयिनी वस्तुन्यहो चक्षु
षा शृण्वत्येव शृणोति न प्रियसखीनर्मानुलापानपि ॥ चेतः क्वापि वच
कुतोपि तदहं मन्ये धुना चिंतया पस्पुर्विप्रियजन्मना चिरमसावाकृष्यते
केवलं ॥ अत एव ॥ प्रातश्चंद्रकलेव पुष्यति दृशोर्नानंदमस्यास्तनुर्निश्वा
सोष्मविघट्टनेन गलितो बिंबाधरे शोणिमा ॥ वीटी चित्रगतेव तिष्ठति

विद्याप

चिरं चिन्मुद्रया मुद्रिता संत्रस्तो विफलोद्यमः परिजनः पर्यंतमासेवते ॥ न
नु पसर्पाम्येनां ॥ उपसर्पति ॥ देवी ॥ पुरोवलोक्य अयि प्रवृत्तेन नु स्मृतम
त्रैव सन्निहितासि ॥ मया तत्रैव पुनरपि किंचित्कार्यविशेषाय प्रहिता कि
मसूयालवया दृष्टा ॥ प्रवृत्तिः ॥ अथ किं ॥ अभिनंदितश्च भवद्वादेशः ॥ अवि
द्या ॥ अनेन वाक्येन नन्वेव शमदमादयः सेवनिवृत्तिरपि कार्यं च तदेव यन्म

याज्ञां किं न मिति ज्ञायते ॥ प्रवृत्तिः ॥ अथ किं ॥ इति कामनाकं पितमखिलं क 25

थयति॥ अवि॥ अयि विषयवासनेस्थान एव खलु मे तर्कः॥ तत्किमत्र मन्यसे॥ विषय॥ सखि नमेतव्यं॥ यत्किंचिदेतत्॥ स्वाध्यायाध्ययनाव बोधविहितानुष्ठाननिष्ठाक्रमैः कांतारे गिरिकंदरे तृणपयोवृत्त्याच शुश्रांतरः॥ आरुह्य श्रवणादि तुंग पदमध्यास्तां निदिध्यासनात्तन्नस्पोतमिवा पवृष्य विषये बध्नामि कामादिभिः॥ विमृश्य॥ हंत शमदमादिसंबंधेन महोपनिषदुपदेशेन च कश्चिदविद्यामपहाय विद्यामधिगमिष्य

विद्याप

तित द्दाहं ब्रजद्दामि ॥ प्रत्यक्षसिद्ध्म पलप्यगिराम भूमिमन्यत्सुखं किमि
तिसाहसिकागृणं ति ॥ अथवा ॥ ओताजनोयदि मिळे द्दतिमं द्दबुद्धिः किं
किन्न बोधयति वंचनकेळिलोलः ॥ मन्मस तयोरसंभावनाविपरीतभा
वनयोः प्रभावं न कोपि विजानाति ॥ किं बहुना ॥ वेद्दारण्यमुपैतु तत्र वि
यद्दालंबाम षावादिनोयेते षांचवचः श्रणोतु मनुतांतथ्यंत द्दवस्त्वयं ॥ २६
मत्स्पृष्टं प्रति वक्तुं किंचन नतनौ कीटादितोद्द मनागुत्सुलेषकुतोनुधावति

26

मषाभूतं किलास्याखिलं॥ स एष वि परीतभावनाप्रभावः केन वाज्ञयः।
किंच॥ मयिप्रभवं स्यामिह कस्यचित् ब्रह्मनिष्ठाकानाम॥ भस्माव कुंठ
ननिमीलनमोहनीयायेयं च कास्ति कुहचित्परमात्मनिष्ठा॥ एषा शि
वोहमिति किंचनशाब्दमात्रमनंतर्न किंचिद्रूपिनम्रमितव्यमत्र॥ अयि
भद्रिनिप्रवृत्तिर्नाम किमियं साधारणीतिमन्यसे॥ निरस्तावशीकृत
मपि बलादियमपकर्षत्येव॥ पश्य तावत्॥ आपुर्भूरिगतंपतंतिसह

शास्तुछेरलंव्याप्तैर्भर्तंभाविपथातथास्थितिमशांशंभोःसपर्याविधौ॥
सन्नद्धोपिसमाधिनिष्ठहृदयोप्युत्सृज्यसर्वंनिजव्यापारंसमयातिपश्चि
च्चकितःक्षणेनयाधावति॥नद्देवमपरिमेयप्रभावयोरावयोरनवरत
मपिभवदम्बुदयैकतानभावयोःसतोःकिन्नामभवदनभिमतमापद्ये
त॥अपिच॥कुटिलकरालकर्मगहनैरतिदुर्वारैर्मोहादिभिरस्मदीय
परिवारैरनवरुध्यतयापरिमितोपिनखलुकश्चिद्देशःकालोवा॥अतस्ता

श्री

नतीस्यच्चेदारण्यप्रवेशोतिदुर्घट एव॥ प्रविष्टोपिकाम्याभिःक्रियाभिरुप
सनाभिश्च बलाद्दाकृष्यत एव॥ प्रव॥ अपिमहद्दिनिकिंचिदहं विज्ञाप
यामि॥ विलासिनीनांपुरुषप्रतीपतारसानुविधायदिशोभते परं॥ य
द्दिस्मसा भग्नरसाकूतव्यथात देवतासांगारिमव्यपोहनं॥ अतो विमु
खोपि विप्रियकार्यपिमन्युवेगमंतरेव निगृह्य विनयेन चातुर्येणच
राजायमनुरंजनीयः॥ अपिच॥ य एषचित्तशर्मोराजनर्मसखः॥ सर्व

परिण

मेतस्मिन्प्रतिष्ठितं॥ अतोयमुपचारैरनुपहमपिविधेयीकरणीयः॥ आ

वामपिसमुचितेषुकेषुचिदर्थेषुव्याप्रियावहे॥ इतिनिष्क्रांताःसर्वे॥ ॥

॥ ॥ द्वितीयोंकः॥ ॥ ततःप्रविशतिनिर्वृत्तिः॥२॥ अत्रभवत्याः

शिवभक्तेर्वचसिविस्रंभेणाजीवराजस्यविद्याप्रतिकृतिंदर्शयिष्या

मीतिकथितवत्यस्मि॥ तत्किमद्यापिसानप्रेषिता॥ ततःप्रविशतिचि २८

त्रपटहस्ताविरक्तिः॥२॥ आज्ञप्तास्मिशिवभक्त्याचित्रपटोयंनिर्वृत्ति

हस्तेदातव्य इति ॥ तत्कस्मान्निवृत्तिर्भवेत् ॥ अग्रतो विलोक्य ॥ कथमियं निवृत्तिः
येषा ॥ समीरणेवातित्वरापिवाचलत्यवेक्षमाणा परितो दिगंतरं ॥ जनस्य कस्या
पि चिरप्रतीक्षया मनो निरुत्संदधतीसमीक्ष्यते ॥ यावदस्याहस्तं चित्रपटंप्राप
यामीति परिक्रामति ॥ निवृत्तिः ॥ विरक्तिमवलोक्य ॥ सखिक्कप्रस्थितासि ॥
विर ॥ सखिभगवत्याभवदंतिकमनुप्रेषितास्मि ॥ इति चित्रपटमर्पयति ॥
निवृ ॥ चित्रपटं निर्वर्ण्य ॥ अहो प्रतिकृतेरभिरूपता ॥ एतद्वाऽस्मनसातिव

र्तिमहितंरूपंबतेयत्तयाचित्तेनोल्लुखितंकथंविलिखितंहस्तेनवातत्कथं॥
अथवानचित्रकारनैपुणमेतत्॥ अप्रज्ञेयमहाप्रभावमहसोभक्तेरियं
प्रायशोभक्तित्राणगरीयसीविरचनान्ननंभवेन्मानसी॥ सखिविरक्तेसंप्रति
किमाचारोजीवराजइतिकिमवगम्यते॥ विर॥ चित्तशर्मणावयस्येनस
हभृंगारवनेमाधवीमंटपमधिवसतिमहाराजइतिश्रुतं॥ विरक्तिः॥ त
र्ह्ययमेवावसरस्तदुपसरणायेतिनिष्क्रांते॥ प्रवेशकः॥ ॥ततःप्रविश

तियथानिर्दिष्टःसचिंतोराज्ञा ॥२॥ सखेचित्तशर्मन् ॥ अत्रभवत्यानिवृत्या
रहस्यावेदनात्प्रभृतिनिकाममस्वस्थहृदयोभवामि ॥ तथाहि ॥ हृद्यंव
स्त्रनरोचतेहृदयजस्तापोनविश्राम्यतिश्वासःशोषयतेधरंशिथिलय
त्यंगानिचिंताममा ॥ मोहेमज्जतिचेतनापिनिमिषःकल्पादनल्पायते
कस्मैकिंकथयेयहंततमिमंकालंक्षिपेयंकथं ॥ चित्त ॥ वयस्यकिंकेव
लेनविषादेनविधीयतांतदुचितोयत्नः ॥ राजा ॥ नमेवखलुनप्रतिपद्ये

चित्त॥ वयस्यसोपिहृदयंगमएवोपनमितो देवेन॥ राजा॥ कथयकथय॥
चित्त॥ वेद्यारण्यनिवासिनः कतिपये दृष्टा मया तापसाः प्रागेकत्रशमाहृ
यःसमुदितास्ते मामवोचन्निदं॥ जीवस्यास्य विभोश्चिरादिहसुखदुःखे
भवा नुभोक्तानस्य श्रेयसि कोपिकश्चिदिवकिंनाटरूप्यमालंबसे॥ इति॥ तदृ
30 नु॥ भोमहाभागाः सांप्रतमस्माकमिह किन्नामसुखंहीयते॥ जीवःसुखा 30
त्माविभुरेषराजाप्रधानभूतोहममुष्यविघ्नकृ॥ भोगाःसमग्राविषयेषु

मत्तस्तरस्छताकाममतत्सुखेषु ॥ तथाहि ॥ उद्यानोदरपद्मिनीपरिसरे पर्यं
तपंत्रोच्चलच्चंद्रोशीरसुगंधिशीकरभरस्फायत्समीरांकुरे ॥ पीतस्वादुर
सायनानिसुहितैरस्माभिरस्तव्यथैर्नीयंते हिसुखैककताननविसरावासंतिका
वासराः ॥ इत्थं कदाकुत्रचिन्नाम सुखं नानुभूयत इतिमयाभिहिते ॥ हंतका
रणास्वभावकृतएषतेव्यामोहः ॥ यद्देवं ब्रवीषि ॥ शृणुतावत् ॥ इहो भूत
समष्टिरत्रतपनाधिक्यपजलं क्षीयते तर्षो नाम स एव तस्प समतात्प्तिःपुन

वीरिणा॥ एकस्योपचये भवत्यपचयो न्यस्य स्वभावस्त्वयं तानां सम ता
पुनश्च किमिह प्रत्येषितव्यं सुखं॥ अहैतं यदनादिमध्यनिधनं सत्यैक
रूपं सुखं तल्लब्ध्वा मुषितं मृषा पितमिवा विद्या विलासैर्निजैः॥ विश्वं दृश्
यते यथार्थवदिदं स्वप्नेंद्रजालोपमं धीरः कः पुनराद्रियेत तदिहास्ते प्र
पंचे सुखं॥ किंच॥ रूपं नाम विशिष्टवस्त्विति पृथग्यद्यत्समालक्ष्यते सर्वं 31
चास्थिरमव्यवस्थितमनिर्वाच्यं च संमर्शने॥ मंत्रीत्वं कियतश्चिरस्य वपु

परः

सुखं

षिव्यस्तेतद्दासेक्कते॥शत्रुंकश्चिद्वेत्तिमित्रमथपरःपुत्रंकुतस्त्वांकुतः॥न
देवमसारमतेजगत्तिसारमतत्किंनाम॥पिष्टरसामृतसदृशंवैषयिकं
तत्सुखंसुखंनैव॥आधिव्याधिजराभिर्दुर्लभमेतच्चकाकमांसमिव॥
न्नतःसुखमस्माभिरिहानुभूयतइतितवभ्रमएव॥भयोपिनिदर्श
यामः॥केषुभावेषुकयावस्थाकिन्नामभवतासुखमन्वभूयत॥याज्ञादै
न्यकदर्थितात्विजनुषांशोच्यैववृत्तिस्त्वसावस्थापत्तविधेयगौरवसुखादु

सेवाहि दुर्जीविका॥ शैलारण्यसमुद्रयानवहनक्लेशादिवावर्त्तनां क्षुद्रं यत्र

क्षुरजीवनं शिव शिव स्मर्य्यतेतन लिंजनैः॥ तद्देवमतिजुगुप्सितोयमविद्या

विलासः॥ श्रूयतामस्य जगतस्तत्त्वं॥ ब्राह्मंतत्त्यदमर्च्चिरादिभिरितोधन्य

स्तेनावर्त्तनेयाधूमादिपथं स्वरेति सयथायातं परावर्त्तते॥ आवृत्तः सतु

लिंगदेहघटितोबाधादिभन्यश्चिरं तिष्ठद्वीहियवासिलाइतिजनिप्रारंभ

काभावतः॥ तद्दनु॥ कालेक्कापि कुहापिकोप्ययदितानश्नातितद्रेतसा ब्रह्म

ऽत्र पुरोगामेषु भजते पुण्यानुरूपं जनुः॥ व्यावृत्ताः पितृलोकतोनधिगतस्व
र्गास्त्वये पापिनश्वानः सूकरपुल्कसाद्यतिजनुःकालेनगच्छंतिते॥ पुण्यप्र
भावाद् ऊर्ध्वलोकगामिनांजीवानामियंस्थितिः॥ येदेवयानपितृयानपथान
भिज्ञाजीवास्तेजनिमृतीः क्रिमिकीटरूपाः॥ व्यावर्तयंतिसुचिरादिह क
ल्पकोटीःनोर्ध्वंव्रजंतिगहनैवममसाववि द्या॥ अतोजीवराजस्यतदेतन्म
हासंकटविमोचनायभवतैवप्रयतितव्यं॥ चिरादरभेहेनोपलाल्यमानाद

माताहृते किमायत्तानि राज्ञसौभाग्यानि॥ तदिह कुतो विचक्षणोपि भवानात्मनो धिकारं न प्रतिपद्यते॥ अपि च॥ प्रयत्न एष तत्रातीप बलवत्तरवर
33 वर्णिनीपरिणयरूपतया न वसुकर एव कथमिह मनावेद्ये वरा हे करणी
यमिति न शंकनीयं॥ विस्रंभप्रणयोचिताः सुचरिताधर्मार्थविज्ञानिनो
येतावत्कुलमंत्रिणः क्षिति भुजामेने किमर्थांतरं॥ अन्यध्र्मे चरं शरीरमप 33
रं सालोचनं लोचनं राज्ञः किं बहुनाभितो विजयिनः प्राणा भवंत्यांतराः॥ नता

वदमात्यमात्वंभवान्॥अपितुनर्मसचिवश्च॥तदपूर्वरमणीसंघटन
मिदमवश्यकरणीयमनुरूपंचे।ति॥तदनुतानहमप्राक्षं॥कस्या किंप्र
भवा किमाकृतिगुणा किन्नामधेयाचसाश्रेयस्तद्घटने किमस्य घटनेक्किं
नामतस्त्रीयते॥तन्वाप्तोपरि पंथिनःकइहनस्मेरंतरायाःकथंतेषामप्यप
नोदनेथघटनेकश्चाभ्युपायोभवेत्॥इति॥तदनुतेमाम वोचन्॥वेहार
णयावसथसुहितास्वामिनीमाहशानामाविर्भूतामननजनिदिध्यासनात्पु

प्ययमूल्ना ॥ विद्युल्लेखाचिरतरसमुद्योतिनीवाद्भुतश्रीरेषायोषामणिरु
पनिषद्वंशभूषाविभाति ॥ विद्याख्याहृद्ययंगमाकृतिरसावस्याःस
मासादनेनव्याधिर्नजरानमृत्युरशनायानोपिपासापिन ॥ नक्लेशो
नभयंचकिंतुपरमानंदंदातिसांद्रीकृतादुःखासंकलिताच्चकाचनदशा
सत्यासमुन्मीलति ॥ सत्यानंदमपारमक्षयमिदंविद्याधनंपंकतःत्व 35
त्वागाढनिगूहितंव्यथयतेलोकानविद्याचिरं ॥ तिष्ठन्नेवनिधौयथानि

धिमविज्ञायैवकार्पण्यतो विषयधावतितद्वदेतद्विदन्जीवःपरं
रिवद्यते॥यस्यांमुह्यतिनिद्रयानिशिजगत्स्वप्नेंद्रजालाकुलंतस्यांजा
ग्रतियोगिनस्तदनयासत्यार्थसंदर्शिनः॥दिव्यादृष्टिरियंनिमेषर
हिताहंतानयापश्यतांछिद्यंतेरिवलसंशयभ्रमविपर्यासाश्चकर्मा
णिच॥अस्यावैभवतोपिनक्तमहरेवास्याभिनिष्पद्यतेतच्छाहर्नक
दापियातिसदहरेवास्यप्रभातोदयः॥आत्मानंदसुधासमुद्रलहरीसा

चेद्दिनासादितामध्यान्होपिनिरंतरेपातमसाघोरोनिशीथोभवेत्॥
इतितदेवंविधदिव्यमंगलगुणग्रामाभिरामाविद्येयं॥राजा॥स
परिशेषं॥ततस्ततः॥चित्तशर्मा॥कामक्रोधमुखाःप्रतीतविभ
वाजीवस्यषड्वैरिणास्तेह्यस्माकमसन्निधौविदधतेनिश्शंकमोजा
यितं॥यत्रामीवयमास्महेसमुदिताःसाकंविवेकादिभिःतत्रैतेनस
मुन्मिषंतिपुरतोभानोरिवांधंतमः॥जीवस्याभिमतोपघातिनइमे 35

विघ्नास्ततत्संभवाः कर्षतोविषयेषुतंविघटयंस्त्वस्मासुयत्संगतिं॥
एतेषामपनोदनेभिलषितेचार्थेभ्युपायस्त्वयंगूढंगाढनिरूढमत्रभ
वतःसौहार्दमस्मासुयत्॥त्वयितुविधेयेसंपन्नकल्पोवेदारण्यप्र
वेशः॥सएवपरमोपायइति॥तदनुकिमेतादृशिमत्स्वामिनःश्रेय
सिमत्सकाशादंतरंपतिष्यतिसर्वथाहमत्रविषयेयुष्मद्दायत्तइति
सशपथमभिहितवानस्मि॥राजा॥वयस्यप्रणयविस्रंभौनामतदि

मावेवयदेवमसन्निधानेपिमदनवगतमेवमद्वीयश्रेयसिबद्धधाव्या
पृतमितिपरितोषमभिनीय॥सखेचित्तशर्मन्॥एतेमच्छूवसीतद
द्भुतगुणास्तोमाम्नतासंज्ञनादस्यंतंसुहितेतदज्ञविषयेबधाभ्यसूयेइव
एतेतन्मुखचंद्रसस्मितसुधातर्षाकुलेताम्पतोमदृष्टीतदमेक्यानुवि
धयासंप्रीणयिष्याम्यहं॥तामालिख्यविनोदयेयनयनेदृष्टायदिस्या
न्मनाक्स्वप्नेतामवलोकयेयमितिचेत्स्वापोदुरापोमम॥अध्यक्षीकर

36

णप्रसक्तिरपि मे तस्यास्तु दूरे गिरा मायासोत्तरमाः कथं नु विषयैरा
त्मानमाश्वासये॥ स्मरणमभिनीय तत्र भवत्या प्रतिश्रुतं प्रतिकृ
ति दर्शनं तु संभाव्यतापि ततः प्रविशति विरत्त्यासह निर्वृत्तिः॥ र
पुरो विलोक्य॥ अयममितश्चित्तशर्मणा नर्मसचिवेन सह विविक्त
मध्यास्ते देवः॥ तदेनमुपसर्पामि॥ उपसृत्य॥ विजयतां देव इति रा
ज्ञो हस्ते चित्रपटमर्पयति॥ राजा॥ चित्रपटं निर्वर्ण्य॥ साश्चर्यं॥ अहो

प्रतिकृतेरभिरूपता॥ शुद्धामृतधाममुखी श्रुत्यंतविसारिदृष्टितोल्लसि
ता॥ विश्वातिशायिवृत्तिर्विषयेषु कुहापि नेदृशी दृष्टा॥ पद्मोल्लासत
37 रंगितं पदयुगं जंघे सुवृत्तोज्ज्वले रंभाडंबविडंबिनौ च तदिमावूरू म
नोहारिणौ॥ मध्यं व्योम सखं विधुरखंडाकारवत्युज्ज्वलः कल्याणीवतसे
यमद्भुतगुणा कल्याणकांताकृतिः॥ साशंकं पार्श्वतो विलोक्य॥ दिष्ट्यात्र
न सन्निहिता देवी॥ ततः प्रविशति विषयवासनया प्रवृत्त्या च सहा वि ३८

द्या ॥२॥ सखि विषयवासने कृतघ्नोपि देवस्त्वद्वचनगौरवेण ममानु
स्मरणीयः संवृत्तः ॥ विषय ॥ प्रियसखि कीदृशमपि दयितमनुसरणे
न हृदयरंजनेन च विधेयीकुर्वंति खलु विदग्धा युवतयः ॥ अविद्या
सखि प्रवृत्ते देवः कतमं देशमधिवसतीति जानीहि ॥ प्रवृत्तिः ॥ परि
तो विलोक्य ॥ नन्वयमित एव चित्तशर्मणा तापसीभ्यां सह शृंगारव
ने मालतीमंटपमध्यमध्यास्ते देवः ॥ अविद्या ॥ तर्हि विटपांतरिताए

त्यक्तुमस्माव इतेषामन्योन्यविस्रंभजल्पितानि॥ इतिसर्वास्तथा कु
र्वंति॥ चित्तशर्मा॥ अपिनामसुखायते हृशोऽरियं चित्रगता प्रियतमा
राजा॥ किमुच्यते सुखायत इति॥ आस्माव्युज्वल इंगमंगमभितः संस्र
प्यनाडीषपिह्लो षावेगकद र्थितासुकरपानुज्जीवयंतीपुनः॥ अस्या
निस्तलतत्त्वंगसुषमा कल्लोलिताकाप्यसावानंदामृ तदिव्यसिंधु
लहरी विभ्वं किलापनुते॥ संप्रति हि॥ आलिप्येनु तुषारलोलनळ

त्कर्पूरगंधइववैरास्सिच्येनुघनीकृतैरुतसुधाधाम्नोमयूखोत्करैः॥ ए
तद्दर्शनसंभ्रमेतेन परमानंदेनदावानलसुष्टोभूमिधरःसुधारससम्परे
णोवांगमाप्याय्यते॥निवृत्ति॥अपवार्य॥सखिविरक्तेदिष्ट्याफलि
तमिवनःप्रयत्नेन॥विरक्तिः॥कथंनफलिष्यतिभगवत्यानीतिवैद
ग्धी॥राजा॥चिरंनिर्वर्ण्य॥सोन्मादं॥चित्रंप्रति॥मद्रामिकिन्नुमम
तुलंपदपल्लवंते किंतेलिखामिकुचयोरुतपत्रवल्लीं॥एह्येहिमेविद

धृतीसकृदंकपालीमंतर्गतं निरवशेषयतापमेनं॥ चित्तज्ञा॥ सोपहा
सं॥ वयस्यप्रतिकृतिरियं खलु तस्याः॥ अविद्या॥ सखिश्रुतं न नुश्रो
तव्यं॥ तदेवमेताभिरितरनायिकासंघटनकुहनाभिरिति संधीया
महे॥ विषयवासना॥ सखिभूयोपि शृणुमस्मावत्॥ निवृत्तिः॥ देव
सत्वरमनयासुहृशा सह भवंतं योजयिष्यामि॥ न पुनरिह विषय भ 39
वता विषादो विधेयः॥ राज्ञा॥ परमकारुणिकीभ्यामप्रमेयमहिमाति

शयाभ्यांभवतीभ्यामनुगृहीतस्यममकोनामविषादः॥ अविद्या॥
सखिभूतानिरवलुभयःश्रवणामृतानि॥ विषयवा॥ प्रियसखिम
वत्सन्निधानेसर्वमिदंविघटितमेवभवेहित्तुक्षतमुपसर्पति॥ ग
ज्ञा॥ हृश्वासभयं॥ वयस्यकाप्रतिपत्तिः॥ चित्तशर्मा॥ वयस्यभव
ताकथमपिसमाधीयेतसा॥ ममतुकागतिः॥ विचिंत्य॥ भवतुतामे
वानुसरेयं॥ इमेचतपस्विन्यौतिरस्कारिणीविद्ययाचित्रफलकेनसह

तिरोहिते भविष्यतः॥ राजा॥ तथेति धैर्यमवलंब्यतिष्ठति॥ चित्तशर्मा॥
उपसृत्य स्वस्ति भवते॥ अविद्या॥ चित्तशर्माणं निर्भर्त्स्य॥ राजानमुप
सृत्य॥ अपि सुखायते चित्रगता प्रियतमा॥ अपि संघटयिष्यतस्तापं
स्यो॥ राजा॥ सभयगद्गदं॥ देवितवासान्निध्याच्चित्तशर्मणा कालवि
नोदनमयविरचितमिदमिंद्रजालं॥ इदं परमार्थतया न गृह्णातु भव
ती॥ अविद्या॥ हंत प्रत्यक्षसिद्धापलपनसाहसमेतस्य॥ राजा॥ अत

पादप्रणामादिभिरुपचारैर्यथोचितंप्रसाद्यतांकुपितादेवी॥राजा॥क
तिचित्यदानिगत्वाप्रणम्य॥प्रसीदप्रसीद॥अविद्या॥सादोपमवध
यगच्छति॥राजा॥नब्रूषेनविलोकसेनचवचस्तथ्यंकणोषिप्रियेक्कि
न्वेतन्मयिताद्दशंतवमनःकस्मादभूदीदृशं॥दंपस्योरूनजायतेकि
ममतंजातंनकिंमृष्यतेकिंवाज्ञातमिहाधुनाविधिरहोतिक्कांविध
त्सेसुधां॥प्रवक्ति॥अपवार्य॥भवत्वयंपादशास्तादृशोवात्वयापुनर

५१

थाभूतमपि वस्तु तथाभूतमिव प्रत्यक्षमुपदर्शयेयुर्नन्विमैंद्रजालि

काः॥ तदपि यदि समयमेवावगच्छसि तत्र कः परिहारः॥ अविद्या॥ न

तावदिदमिंद्रजालं चित्तशर्मणः॥ अपि तु तवैव साहसमेतत्॥ क्व

ते तापस्यौ॥ क्व च सा प्रतिकृतिः॥ राजा॥ ननु कथितमेव सकलमिंद्र

जालमिति॥ त्वं तु परमार्थतयैव प्रतिपद्यसे॥ अविद्या॥ कृतं कृत

मकृतज्ञेनानेन शठेन॥ इति सादोपं परावर्तते॥ चित्तशर्मा॥ वयस्य

पादप्रणामादिभिरुपचारैर्यथोचितंप्रसाद्यतांकुपितादेवी ॥ राजा ॥ क
तिचित्यद्रानिगत्वाप्रणम्य ॥ प्रसीदप्रसीद ॥ अविद्या ॥ सादोपमवध्
५१ यगच्छति ॥ राजा ॥ नब्रूषेनविलोकसेनचवचस्तथ्यंशृणोषिप्रियेकि
न्वेतन्मयितादृशंतवमनःकस्मादभूदीदृशं ॥ दंपत्योस्तुनज्ञायतेकि
ममत्वंजातंनकिंमृष्यतेकिंवाज्ञातमिहाधुनाविधिरहोतिक्तांविध
त्तेसुधां ॥ प्रवक्तिः ॥ अपवार्य ॥ भवत्वयंयादृशस्तादृशोवात्वयापुनर

पारुष्यमेवावलंब्यतां॥य विषयवासना॥युक्तमाह प्रवृत्तिः॥अविद्या॥
हं तभवतीम्यामपीदंरोचते॥कागतिरितितिष्ठति॥राजा॥मांकल्पा
पिपुरातवोपयमनाद्येकेपिकिंज्ञानते त्वामासाद्यमया प्रियेनवनवं
क्लिन्नानुभूतंसुखं॥तत्ताद्दृङ्महनीयवैभववतीसौभाग्यसीमापिता
मांमत्वाकृतविप्रियंबतकथंव्याधन्वतीधावसि॥त्वंवित्तादपिगात्र
तोपिकरणग्रामादभिप्रेयसःप्राणादप्यधिकेतिसुंदरिभवत्प्रीत्यैक
बद्धादरः॥वर्तेहंवितथव्यलीकपरुषानैर्घृण्यमालंबसेयद्येवंमयि

सर्वथैवपरितः किंवाकरिष्याम्यहं ॥ अविद्या ॥ सोत्प्राशं ॥ सख्योऽकृतंख
लु ॥ हे वयस्यास्य किलाहमद्य ह्यपितान्प्राणाह्यपिप्रेयसीह्रनेचवक्षुषितो
हनैरलमहोवाक्यैरमीभिस्तव ॥ यद्वावल्लभवस्तुसंगिनिमनस्या
त्मन्यनायत्ततातद्दोषाद्यथोचितंव्यवहरस्येवंनदोषस्त्वयि ॥ वि
षयवासना ॥ हे वसर्वतोमुखविचित्रपरमानंदविधायिनीद्ववीम 42
पहायवाङ्मनसातिवर्तिनी कुहापिविषयेकुतोभवानासज्जति ॥ वि

त्तशार्मा॥ वयस्यतथ्यमाह विषयवासना॥ प्रवृत्तिः॥ आर्य चित्तशार्म
न् प्रगल्भोसि॥ समयोचितमभिधातुं॥ तथ्यमेवाह विषयवासना
त्वयितु नव्यवस्था॥ चित्तशार्मा॥ सएषममसहजोधर्मः॥ अविद्या
अलमलमतिप्रसंगेन॥ नेपथ्ये॥ वैतालिकौ॥ एकः॥ मोक्तुं तापमि
वप्रतीचिजलधौ मज्जत्ययं भानुमान्नागः कोपि विजृंभते घनपथे
चित्तेवधनामपि॥ आर्द्रागः कुपितामुपासिसिषतेकांतां विलासी

जनोभत्तस्याकर्मठभूमिर्देवपरिषत्संध्यांचसायंतनीं॥ द्वितीयः॥
गंधेनस्फुटकैरवाकरभुवाविष्वग्विकर्षन्नलीन्स्वछंदं दिवसावसान
पिशुनोमंदानिलस्पंदते॥ भावीनौविरहाधिरित्यविदितेप्यंतःशुचा
स्खीयते कोकेनप्रिययासहैकनलिनीनालाधिरूढेनच॥ सर्वेआकर्ण
यंति॥ चित्तशर्मा॥ देवातिवर्ततेसंध्यासमयः॥ राजा॥ तथेतिनिष्क्रां
ताःसर्वे॥ ॥ तृतीयोंकः॥ ॥ ततःप्रविशतिचित्तशर्मा॥ तेजोवै

भवकौशलोपकरणान्यथामुधासिद्धिषुव्यक्तं राघवपांडवादिषुरपो
मुह्यत्सहृष्टं हितत्र। तन्मन्येपुरुषस्यकांक्षितहितावाप्तिस्तद्दैवेछया
स्वेनेदंवृतमेतदाप्तमितियेनंदंतिमूढास्तते॥ अथखलु॥ विस्त्र
मप्रणयास्पदस्यसुहृदो निर्व्यूढमिष्टादिकंदैव्याःप्रार्थितकार्यसाध
नव्रताप्रीतिःसमग्रोदया॥ तत्रापिस्वसमीहितार्थफलसंपत्तिर्विरो
धंविनादैवेनोपनतंकियत्कियदहो वांछानुरूपंहितं॥ तदिदमद्भु

तत्संविधानमत्र भवत्याः शिवभक्तेः कस्यमुखेन कर्णपथमवतारये
यं ॥ सा तावदिलस्य प्रतिनिवृत्तयोर्विरक्तिनिवृत्त्योः सकाशादत्र चित्रप
टदर्शनवृत्तांतमवकर्ण्यं तु रितमिह कार्यमिति बहुधा निर्विद्येत ॥
अतः सत्वरमेतदर्थप्रापणोकः समर्थो भवेत् ॥ पुरो विलोक्य ॥ दिष्ट्या
सत्संगोयमित आगच्छति ॥ य एषः ॥ धुनीते संतापं दुरितशात चिंतासमु
दितं तमस्तोमं क्लेशांतरणिरिव सद्यः समुद्दधन् ॥ निरुंधे दुर्वृत्तं निखिल

मपि पर्यंतविरसं पथ्यः पुण्यानेव प्रथयति परिक्लेशविधुरान्॥ ततः प्रविशति सत्संगः॥२॥ आदिष्टोस्मि तत्र भवत्या शिवभक्त्या॥ चित्तशर्मसुखेन जीवराजवृत्तांतमवगम्य सपदि परावर्तस्वेति॥ पुरोवलोकयन्॥ अयमसौ चित्तशर्मा॥ यावदेनमुपसर्पामि॥ उपसृत्य॥ अपि कुशलं वयस्याय॥ चित्तशर्मा॥ विशेषतश्च भवत्समागमेन॥ सपरितोषं॥ सखे सत्संगसमये समुपगतोसि॥ शृणु तावत्॥ अहं

किलवयस्येनजीवराजेनसंदिष्टोस्मि। सत्संगः॥ कथमिव॥ चित्तश
र्मा॥ वयस्यचित्रदर्शनात्प्रभृतिनितांतदुर्मनायमानादेवीतत्तद्विचि
तचमत्कारिचतुरतरोपायैरुपसर्त्तव्यभवतातथासमाधेया॥ यथास
स्वयमेवमामुपागम्यवेदारप्रवेशगमनमभ्यर्थयतेति॥ तदनुकथमे
तदुपपद्यतां॥ आः ईदृगसाकथमियंहिमयाभ्युपेयाताहक्‌क्रूरकठहृदया ४५
थकथंप्रसाद्या॥ भयःप्रतीपयुवतिस्मृतिकारिणीषुवेदारदवीषुगमनस्य

कथाकथंस्यात्॥इत्येवमतिमात्रञ्चिंतातरङ्गितेमयितत्क्षणमेवस
त्वरोपगतयादेव्याःसहचारिण्याकुहनयाभिहितंआर्यभवद्दाकरणा
यभट्टिन्याप्रेषिताहमिति॥तदेवकर्ण्यकिमेतदापतितमितिमयि
किमपिकिमप्यंतराशंकमानेनकिंचिदत्रविचारस्थानमार्यभवंतं
संमानयितुमत्रभवतीसमाह्वयतीतिसाकथितवती॥सत्संगः॥
ततस्ततः॥चित्तशर्मा॥तदनुकिमययमसंभावितोपन्यासस्त्वयाक्रि

यते॥ तदधुनासप्रकारमखिलमावेदयेत्यनुयुक्ताबृहन्नायथावत्तम
भिहितवती॥ सत्संगः॥ इदंश्रोतव्यं॥ चित्तशर्मा॥ नितांतदुर्मनाय
46 मानांदेवीप्रियसखीविषयवासनारहसीक्ष्णंबोधितवती॥ यथाप्रि
यसखित्यज्यतामिदमाकस्मिकंवैलक्ष्यंशृणुतावत्॥ चित्तशर्मणा
मायंजीवस्यनितांतमंतरंगास्तदस्मिन्निखिलराजकार्यधुरंधरेवि ४६
रोधोनफलति॥ अतस्तमिममनुरुध्यैवराज्ञाविधेयीकर्तव्यइति॥

सत्संगः॥सुष्टु कथितं विषयवासनया॥तदनु देवीसमक्षमुपगम्य
निश्शंकमहमब्रुवं॥सत्संगः॥कथमिव॥चित्तशर्मा॥कुतोपि हेतोर
तिदुर्मनायते चिरेणाराज्ञाचतुराभवत्यपि॥मनोनुरुध्यैव तदीयमा
त्मनोमनोरथःसंप्रति किन्नपर्यते॥तस्याहि चिरादभिलषितोवेदार
ण्यप्रवेशः॥तत्र नित्यसन्निहितशमदमादि विघटनाय प्रागेवस
न्निधापनीयामहामोहादयोमहामात्राः॥तदनुतत्रभवत्यासहप्र

विशेराजनिकाम्याभिः क्रियाभिरुपासनाभिश्चतरलीकृते सेत्स्यति
समयस्तेमनोरथइति ॥ सत्संगः ॥ साधुसम्यगुपक्रांतं ॥ चित्त ॥ तदहं
देवमविद्यया सहवेहारण्यपरिसरं प्रापयामि ॥ सत्संगः ॥ सखेसत्व
रमेवनिर्वर्तनीयोयमर्थः ॥ चित्त ॥ कुतः ॥ सत्संगतिः ॥ निवृत्तिमुखा
जीवराजगुणानवकर्ण्यबलवदुत्कंठिताविद्या ॥ तथाहि ॥ आदर्श
भित्तिभजतेनविहारगेहमासन्नचंद्रमभितः स्वमुखांबुजेन ॥ आली

रभिप्रतिवचोगणतीगवाक्षमारामकोकिलभयेनमुहुःपिधत्ते॥ तदेवमतिमात्रविरहसंतापजनितोन्मादतरलितासा॥चित्तशर्मा॥सहर्ष॥एवमन्योन्यानुरागेसतिसुकरमेवकार्यशेषंतर्कयामि॥सत्संगः॥सखेभवंतमधिकृत्यकिंचिद्दिवसंदिहानेनमयाकदाचिदत्रभवतीशिवभक्तिरभिहिता॥सांप्रतमस्माकमतिविधेयोपिचित्तशर्माचिरतरमविद्यानुबंधीकथमस्मदभिमतकार्यानुकूलोभवेदिति॥त

दृनु निजहृदयनिर्विशेषमेवत्वामिहमन्यमाना भगवती कथितवती
सएव कार्यमिदं प्रस्तुतमभिनिर्वर्तयिष्यतीति ॥ चित्तशर्मा ॥ परेंगि
तपरिज्ञानप्रवणहृदया हि महानुभावा भक्तिः ॥ सस्मितं ॥ अये ससंग
सत्यमहमेवमेवं शंकनीयो भवेयमत्र भवतीयदि नमामनुगृह्णीयात
संप्रतितुमदध्यवसायः श्रूयतां ॥ भुंजानः सुचिरादमेदृविधया भोगा ४८
नहं स्वामिनोजीवस्याभ्युदयाप्यवर्षमं चलणप्रायं स्यजाम्यत्र तु ॥ संग्रामेस

मुपागते निजभुजव्याधूतखड्गाहतिच्छिन्नस्वीयसनाभिवर्गविपिनस्क
र्णः प्रमाणं मम ॥ किंच ॥ गोत्रानुबंधममतादिषु निर्विशेषसत्ताहृश्यन्तु
ल्महत्तर एव भीष्मः ॥ स्वामी सुयोधन इति स्मृज यायतस्य शास्त्रास्त्रव
र्षपरुषो जनि पांडवेषु ॥ अतस्तदनुग्रहभाजनमहमन्यथा नशंकनी
यः ॥ सोहमचिरेणराज्ञानमविद्यया सह वेद्वारण्यं प्रवेशयामि ॥ तद
नुतत्र कामनानुविधूतत्तदुपासनाभिरविद्यापि राज्ञानं प्रलोभयेत ॥ त

दनंतरकरणीयेभगवतीप्रमाणां॥सत्संगः॥अत्रभवतीशिवभक्ति
स्ताभिरेवोपासनाभिःसाकमनतिविलम्बाद्दहरविद्यायाःपदांतरएव
विद्यामपिराजमात्रदृष्टव्यतयानुप्रवेशयितुमध्यवस्यति॥चित्तशा
र्मा॥अतःसत्वरमिममुदंतमावेदयितुमत्रभवतीशिवभक्तिरुपगम्य
तां॥अहमपिभद्रशालाभ्यंतरमामेवसुचिरंप्रतीक्षमाणास्यवयस्य ८९
स्यसकाशंगच्छामीतिनिष्क्रांतौ॥ ॥विष्कंभः॥ ॥ततःप्रविशतियथा

निर्दिष्टोराज्ञा ॥२॥ स्मरणमभिनीयहंतमया निजकार्यनिर्वर्तनैकचे
तसामहृदनुचितंकृतं ॥ यदेषवयस्योबुभुक्षित व्याघ्रीपरिसरमभि
वर्धितोहरिणशावइववनितांतपरिकुपितायादेव्याःसविधमार्द्रापरा
धोगमितः ॥ तत्रकतिकतिपरिभवाननुभूयकथमिवपरिखिद्यते
वानज्ञानामि ॥ ततःप्रविशतिचित्तशर्मा ॥२॥ हंतवयस्योयमतिमा
त्रविद्याविरहतापेनपरिभूयते ॥ तथाहि ॥ वीक्षानिर्विषयानि

(५०)

कामममलसप्रांतेचकांतेदृशौशश्वत्किंचमितैर्वृतःपरिजनैरेकांतमा
सेवते॥नारम्भावस्तुषुवल्लभेषुमनसोनिष्ठानकुत्रापिवातेजोमात्र
ससारमर्त्तिरधुनाजागर्त्तिजीवोविभुः॥यावदेनमुपसर्पामि॥उपसृ
त्यविजयतांदेवः॥राजा॥दृष्ट्वा॥सपरितोषं॥वयस्यप्रसन्नइवलक्ष्य
से॥किमस्तिकश्चिद्विशेषः॥चित्तशर्मा॥अथकिं॥राजा॥कथमिवचि ५०
त्तशर्मा॥किंचिदिवोपसर्पन्निदमिश्रमितिवृत्तमखिलमर्थमानुपूर्व्या

त्कथयति ॥ राजा ॥ वयस्य किमत्र देवीसन्निदधीत ॥ चित्तशर्मा ॥ सहप
रिवारैरुपगतैव ॥ न तः प्रविशति विषयवासनया प्रवत्साच महावि
द्या ॥ अविद्या ॥ सनिर्वेद ॥ सखिविषयवासने बहुप्रकारमनुसृतो
पि देवः सर्वथा न यथापुरमस्मासु प्रसीद इति ॥ कर्तव्यस्त समुद्याचारः (५१)
इति कृतिचित्यद्यानि गत्वा ॥ पुरो वलोक्य ॥ कथमत्रैव चित्तशर्मणा
सह विविक्तमध्यास्ते देवः ॥ यावदेनमुपसर्पामि ॥ उपसृत्य विजय

तां देवः॥ राजा॥ इतश्च आस्यतामित्यासनं निर्दिशति॥ चित्तशर्मा॥ देवि
दिष्ट्या वर्धसे॥ विषयवासना॥ वर्धतां महाराजः॥ राजा॥ चित्तशर्माणं
संज्ञापयति॥ चित्तशर्मा॥ देव भवतां सह वैदारण्यविहाराय बलव
दुत्कंठिता देवी॥ तत्कुतो विलंबसे॥ राजा॥ यदभिलषितं देव्यै॥ इति
सर्वे उत्तिष्ठंति॥ देवी॥ स्वगतं॥ का गतिः॥ राजा॥ कः कोऽत्र भोः॥ प्रविश्य
दौवारिकः॥ अहमस्मि॥ राजा॥ संकल्पवैदारण्यमार्गमादेशय॥ संक

ल्पः॥ इत इतो देवः॥ सर्वे वेह्मारण्यगमनं नाटयंति॥ राजा॥ वामपार्श्व
तः कर्णं दत्वा॥ अये चित्तशर्मन् अत्र केषामपि परस्परालाप इव श्रू
यते॥ चित्त॥ स्मरणमभिनीय॥ किंचिद्विवोपसृत्य॥ ऊनां॥ वयस्य
देव्याहितान्वेषिभिर्मोहादिभिरधर्ममार्गो भवत्प्रलोभनाय लोकायति (५२)
कादिपाषंडसिद्धांताः सन्निवेशिता इति वस्तु विचारेण संप्रत्येवमेक
थितं॥ प्रायस्त एते भवेयुः॥ पुरो विलोक्य॥ य एषः॥ असारमेतज्जगदि

त्यवेत्यतणादिवत्यभ्यतिहृभ्यज्ञालं॥ अंतश्चिदानंदरसानुभूतिमंगैःसमु
द्यत्पुलकैर्व्यनक्ति॥ ततःप्रविशति वस्तुविचारः॥२॥ आदिष्टोस्मितत्रभ
वत्याशिवभक्त्या॥ वत्सवस्तुविचारसंप्रतिजीवराजोवेदारण्यंप्रविवि
क्षुरितिश्रूयते॥ तदेनमपथान्निवर्त्यसतैवपथासमानेतुमस्यपरि
सरोधिगंतव्यइति॥ पुरोविलोक्य॥ सएषजीवराजः॥ यावदेनमुपस
र्पामि॥ उपसर्पति॥ राजा॥ चित्तशर्मणासहप्रणमति॥ वस्तुविचारः॥ सि ५२

(५३)

क्षसंकल्पोमयास्तां ॥ अवि ॥ सविषादं ॥ स्व ॥ हंतविफलोमेमनोरथः

पाषंडेषु ॥ तत्प्रविशंतिपाषंडसिद्धांताः ॥ तत्रलोकायतिकसिद्धांतः ॥

नक्लेशलेशयोगोभोगोनुपरोधएवसर्वत्र ॥ इतिसतिकिंनरमंतेमं

दधियोहंतमामकेतंत्रे ॥ इतिपरिक्रामति ॥ चित्त ॥ राजानंप्रति ॥ अ (५३)

त्रायमस्याशयः ॥ प्रत्यक्षमेवप्रमाणमदृष्टचरंतुनास्त्येव ॥ तथाच ॥

पृथिव्यापोवह्निःपवनइतिसत्याःपरममीतदेषांसंघातोभवतिवपुरा

त्माबहुविधः॥ समष्टेस्तांबलादरुणिमवद्गुन्मीलतिमतिःसुखादिर्व्यापा
रेरूपनमतिधर्मादितुमरषा॥ अतः॥ देशःकालोथजातिःकुलमकुलमिय
स्वापरेत्यादिहेतोर्वर्ज्योवर्जेतिमिथ्याकुहकविरचितांयंत्रणामंतरेण॥
आद्येरवाद्येथपेयेप्यनियमिततयाकाममापुष्पगात्रं दृष्टामिष्टामवा
प्यस्मरमदमुदितांभोगएवाभ्युपेयइति॥ चित्त॥ सच्चसंज्ञं॥ वयस्य
लोकायतिकमतमिदंमतिरमपीयं प्रतीयते॥ यदत्रनिविधिर्ननिषे

(५४)

धोन धर्माधर्मौ नास्ति परलोक इत्यादिना प्रत्यक्षसिद्ध विषयाभिरति नि

रातंका हि प्रतीयते ॥ अ वि ॥ स्व ॥ सहर्षं ॥ कथमप्यस्मदीय एव चित्तश

र्मा ॥ राजा ॥ सस्मितं वत्स विचारं पश्यति ॥ वत्स ॥ सोद्वेगं ॥ स्व ॥ प्रमा

दः ॥ २ ॥ पर्यायेण सत्पथमेनं नयेयं ॥ प्र ॥ किमये चित्तशर्मन्ननभिज्ञ (५५)

इवालपसि ॥ वयं किमिदमखिलमस्तीत्यवोचाम ॥ किमपि नास्ति ॥

यत्साक्षादिति प्रत्यक्षसत्यर्थाभिरतिरनातंकेति ब्रूमहे ॥ शापादिवशा

द्दिहार्थांतरभ्रमेणाविश्रंखलविषयाभिरतिस्तु नरकायभवति॥ तथाच
तस्यप्रत्यक्षप्रमितार्थसत्यत्ववाहाप्येतदभिप्रायकएव॥ नास्तिपर
लोकइत्यादीन्यपिब्रह्मव्यतिरिक्तस्यसर्वस्याप्यभावोपलक्षकाणि॥त
स्यदेहात्मत्ववादोप्यन्नमयकोशस्यात्मोपलक्षकत्वनिबंधनइतिसर्व
मद्वैतपर्यवसाय्येव॥ राजा॥ सशिरःकंपंपुरोविलोक्य॥ परिहितकषा ५४
यवासाःपरिहृतहिंसःसमस्तभूतेषु॥ अभ्येतिभिक्षुवेषःकश्चिद्विहीनोत्र

बुद्धसिद्धांतः ॥ बुद्धः ॥ अहो मंदमेधसः स्वानुभवविरुद्धो व्याहारः ॥ प्रत्यक्ष
तोयत्प्रमितं कदापि तदेव सत्यं न ततोन्यदस्ति ॥ इत्येव बुद्धिर्यदि तर्हि क
स्मादपरस्य हेतोरबलामुपैति ॥ चार्वाकः ॥ अये बुद्धसिद्धांत किमनुमान
मपि ते प्रमाणं ॥ बुद्धः ॥ कस्संदेहः ॥ उर्ध्वं चाधश्च नानाविधभुवनभिदा (५६)
नामरूपव्यवस्थां कुर्व्वीमा चक्रवालाद्धनगिरिसरितामर्णवानां च तत्व
ज्योतिश्चक्रोपरागस्थितिगतिसदसद्भावियोग्यानियेन प्रत्यक्षं दर्शयेहं

(५५)

कश्चविचहंतामत्रहंतानुमाने॥ अतःप्रत्यक्षमनुमानंचप्रमाणंमेनसंश
यः॥ अस्तिस्वर्गश्चनरकोधर्मोधर्मश्चकारणं॥ परंतुपरिदृश्यमानमखिं
लमपिक्षणात्क्षणविलक्षणतयाक्षणिकमेव॥ पश्यतावत्॥ क्षणादूर्ध्वं
न तिष्ठंतिशरीरेंद्रियबुद्धयः॥ दीपार्चिरिववर्तंतेस्कंधाःक्षणिकंविनः
प्रत्यक्षंजायतेविश्वंजातंजातंप्रणश्यति॥ नष्टंनावर्ततेकिंतुजायतेचपु
नःपुनः॥ तथाच॥ कर्मोत्तेजितवासनाकृतजगज्जन्मप्रवाहोयथाजालांतः

(५६)

प्रस्तात्कृतिज्ञसिरज्ञस्तोमस्तथाभासते॥ धारावाहिनिबोध एवगाकृति

ज्ञानेनसावासनापश्चान्निर्विषयोमलश्चसभवन्नात्मापवर्गोमतः॥

अत्रबाह्यार्थः प्रत्यक्षविषयइतिवैभाषिकोऽज्ञ्याह॥ बोधाकारानुमे

योबाह्यार्थइतिसौत्रांतिकः॥ बुद्धिमात्रमर्थोनकश्चिदपिबाह्यइतियो

गाचारः॥ नबुद्धिमात्रमपिशून्यमेवतत्वमितिमाध्यमिकः॥ तदेवंच

तुर्मतमेतच्छास्त्रं॥ चित्त॥ वयस्यनियताध्ययनविहितानुष्ठानसंक (५६)

रमंतरेणसुगमनिश्श्रेयसमिदंकुतःसुगतमतमनादरणीयं॥ वस्तुवि
चारः॥ तदपिश्रूयतां॥ अनाद्यविद्यावासनाप्रपंचिताविषयसंततिः
स्वरूपज्ञानेप्रतीयते॥ तदिदमेवसंसरणंनामतदनुतत्वज्ञानतोवा
सनाविगलनेसतिस्वरूपज्ञानस्यनिर्विषयोपरागत्वमेवापवर्गइत्य
द्वैतमेवाभिमतमस्यसुगतसिद्धांतस्यापि॥ अतएवामुष्यजगन्मिथ्या ५६
त्वाभिप्रायःशून्यवादःक्षणिकतावादस्तुविशेषणीभूततत्तल्लक्षणानि

(५८)

स्यत्वाभिप्रायकस्सचायमपवर्गोनिष्कामकर्मानुष्ठानजन्यचित्तशुद्धि
द्वारकउपनिषद्धिगम्यइत्येतदाशयमविज्ञायशापवशेननिगमप
थपरित्यागस्तनरकायभवति॥लोकायतिकसिद्धांतः॥विवसनसिद्धां
तंपश्यति॥विवसनसिद्धांतः॥सहस्तताळंविहसन् अहोस्वव्याघातो (५८)
पहतोयमस्योपन्यासः॥प्रत्यक्षादधिकंप्रमाणमुररीकृत्यानुमानंततो
गम्यंधर्ममुरीकरोतिचततःस्वर्गादिभोगादिच॥यस्मत्तत्क्षणिकंब्रवी

तिचपुनर्व्याहन्यते स्वंवच स्वैनैवास्यन किंजिगीषति कथं बुद्धोमतेनामुना
सुगतः॥साध्यसयं॥अयेनग्नक्षपणकसिद्धांत दूरत एव तिष्ठ॥स्नातप
तःसन्निधेहि स्वमतमभिधातुं॥विवसनः॥देहोयंमलभांडमस्यरुचिताका
नामतो थौ दृकैर्देही निर्मल एव तिष्ठ तिघरस्यांतःप्रदीपोयथा॥देहोनांत
रितस्तु संसरतिसःस्वीयैर्हृतःकर्मभिः॥प्रारब्धानुगुणंप्रपद्यचवपुर्भुंक्ते 57
सुखंवासुखं॥बुद्धः॥अयेकिमर्थमावरणंनक्रियते॥विवसनसिद्धांतः

(५८)

जीवस्यावरणं देहो देहस्यावरणं कुतः॥ यदि तस्यापि कार्यं स्यात्तस्यापीत्य-
नवस्थितिः॥ बुधः॥ अये कथमेतादृशस्य जीवस्य मोक्षः॥ विवसनः॥
शृणु तावत्॥ मयूरपिंछधारणं मलं च केशलुंछनं महर्षिपूजनानि न
ग्नता मनस्विनीर्ष्यता॥ अहिंसनं क्षमा दया सदेति मोक्षसाधनैः शरीर (५८)
कारि कर्म तत्समवासनं विनश्यति॥ तथा सति॥ उच्चैर्भूरि महोनिरंत
रमहालोकांतराणामुपर्यास्ते मोक्षशिला नितांतमहिताज्योतिर्मयीशा

भ्वती॥ नामभ्येतिद्यदित्यसौत टिद्दिवोद्गच्छन्वपुर्ध्वंसनात्तत्रायं परमात्म
नाथघटतेमोक्षायमर्हन्मतः॥ बुध्यः॥ अयेकुतस्तवायमध्यवसायः॥ वि
व॥ शाह्नेनानुमानेनच॥ बुध्यः॥ किमयमेवसिद्धपरमेष्ठिपदाभिधेय
परमात्मातवमतेजगत्कर्ता॥ नहि नहि॥ कर्मभिरेवजगंतिजायंतेवि
नश्यंतिच॥ वस्त॥ अस्यापिस्वप्रकाशसंविद्रूपदेहातिरिक्तात्माभ्युप
गमेनसिद्धपरमेष्ठिनामकपरमात्माभ्युपगमेनचजीवपराभेदरूपम

(५८)

द्वैतमेवाभिमतमितिरमणीयमेवमतं॥परंतुएतदभिमताहिंसा
क्षमादयादिपारक्यानुसंधानतायज्ञादिकममुष्यानभिमतमितिभ्रां
त्त्याशापवशेननिगमपथपरिभ्रंषरूपतनायजायते॥अतःस्याद्‌सी
सादिसप्तभंगीप्रतिपादनंजगदनिर्वचनीयत्वतात्पर्यकं॥देहशौचा (५८)
द्यभावप्रतिपादनंचात्मनःस्वतोनिर्मलत्वाभिप्रायकं॥अविद्या॥ज्ञ
ना॥सखिविषयवासनेदेवोयमवैदिकानीतिखलुमतान्यमनिनसं

(५६)

मन्यते ॥ वैदिकेषु सोमसिद्धांतादिषु वा किंचिद्भिनि विश्ययदि सगुण
विद्याभिरभिरमेत ॥ तावतापि न नुभवेदस्माकमाश्वासः ॥ तेजस्तिमिर
वदद्वैतविद्या किल ज्ञात्यंतिक विरोधिनी दृश्यते ॥ राजा ॥ पुरो विलोक्य
क एषः ॥ भस्मलेपशरदभ्रविभ्रमं विभ्रदुग्रवपुरद्भुतभ्रमः ॥ पुंडरीक
धवलाननभ्रमत्चंडकोकनदचारुलोचनः ॥ चिन्त ॥ अयमेव सोम ५९
सिद्धांतो नाम ॥ सोमसिद्धांतः ॥ सस्मितं ॥ हंत प्रमाणपथातिवर्तिन एवा

59

नेन केपि केपि पदार्थाः अनायंते ॥ अपिच ॥ तदागमास्तद्धिरए ववर्त
ताम तोपवर्गोस्य यथाकथंचन ॥ यद्दै हिकं सौख्यमिदं किमीर्यतामतो
भशांग र्हितमार्हतं मतं ॥ किंचिदंतर्विमशान् अहोवत मामकमत
स्यरमणीयता ॥ ज्योत्स्नाधौतदिशा निशापरिकरै र्विश्वोत्तरं चत्वरं म (६०)
घंहर्घ्यरसं मदालसवधू वक्त्राम्बुजामोदितं ॥ आस्वाद्यंत रसं घृतादिस
रसं कांताकरांतादिति स्वर्गं प्राप्यसमग्रमत्र परतः प्राप्यो पवर्गोपियत्

(६०)

विवसनः॥सभयोद्वेगं॥स्व॥हंतकथमयमंतकरवच्चिंताविषयोप्यिसंता
पयति॥प्रका॥अरेसोमसिद्धांतकस्तवमतेधर्मः कथमिवस्वर्गःक
रवचापवर्गः॥सोमसिद्धांतः॥अरेश्रूयतां॥प्रत्यग्रप्रहतक्षरस्खल
60 स्खलद्रक्तप्रवाहक्षणोल्लसन्मर्त्यनवोपहारनिवहैर्मद्यैश्चसंप्रीणितः
सार्वज्ञादिसमग्रहिव्यगुणसंपत्यामहाभैरवःसारूप्यंनिजमातनो 60
तिबलभिद्योग्यंचभाग्यंदिशन्॥सदेहकैवल्यमिदमेवनःपरमपु

(६१)

रूषार्थ इति स्वर्गस्त्वयमेव॥ यदत्र समभिलषितसर्वार्थसिद्धिभिरनियं
त्रिताः कामोपभोगा इति॥ वल्ल. वि॥ अये चित्तशर्मन्नेवमेव मे द्वादिनः
सर्वेऽप्यस्मदीयसगुणोपासनफलीभूतेषु तत्तदुपासनतरतममत्वानुगु
ण्येन सालोक्यसामीप्यसारूप्यरूपेषु यादेषु रममाणा आनन्दैवपरममस्म
तं मन्वते॥ तथा हि॥ जीवाणुत्वनित्यत्ववादिनो रामानुजीयाश्चिराद्दुष्कर्म
कबलितज्ञानानन्दस्वभावतया संसरन्तो जीवा दुःखानुभवनिर्विण्णाः भ (६१)

त्त्या प्रपत्त्या वा हरिमाराध्य तत्प्रसादेन विगलत्कर्मबंधा भगवत्सारूप्यम
धिगम्य स्वकीयधर्मज्ञानविकासेन भगवदानंदमनुभवंतीति अभि
61 दधते॥ तथैव प्रत्यक्षादित्रयप्रामाण्यजगत्सत्यत्ववादिनो माध्वा अप्यवि
द्यासंकटविघटितज्ञानानंदस्वभावाः सत्वतो भगवद्भिन्ना जीवाः संसरण
दुःखानुभवनिर्विण्णाः सकलाम्नायसमधिगम्यं भगवंतं भक्त्या समारा ६१
ध्य तत्प्रसादतः श्रवणमननादिविगलदविद्यावरणतया विशुद्धस्वभा

(६२)

वांभगवच्छरीरंभूता दिव द्वाविश्वनीरक्षीरवद्दवस्थिताः स्वस्वाधिकारत
रतमभतानुगुण्येन तदीयैरेवावयवैः स्वस्वजात्यगुणान् भोगान् भुंजते
सएवमोक्षइत्याचक्षते॥ सोमसि॥ किमपि किमप्यालपन् पारवश्यम
भिनयति॥ रा॥ पुरो विलोकयन्नये किमेतावदस्य वैकृतं कापालिकस्य (६२)
चित्त॥ अयं किल महाभैरवपूजावसाने निपीयमद्यमतिमात्रं उन्मत्त
कितमदावेशाविवशो लुठति॥ सोमसि॥ सरभसं समुपसृत्य विकटतांड

वंपरिक्रामन्॥ अहोप्रमादः प्रमादः॥ परमपुरुषार्थः केनापि दुरात्मनाचो
रितः॥ किमितो विधातव्यं॥ पार्श्वतो विलोक्य॥ प्रसंगभासि परिपांडु गौ
नोर्ध्वपुंड्रः पद्माक्षजालतुलसीमणिहारकंठः॥ भाषास्कृतिं परि पठन्निह
यांचरात्रसिद्धांत एषभुचिवेषमहमभ्युपैति॥ सरभसमुपसृत्य॥ तांत्रि
कं पाणौ गृह्णन् कथमरे मदपवर्गमचूचुरस्त्वं॥ तांत्रिकः॥ अवसीकराम्यां
पिधाय रामानुज रामानुज किमहं चोरयामि॥ श्री वैष्णवः॥ सोम॥ यदि प्र

(६३)

मापातोमहाजनानुमतमेवचौर्यमवसितं॥तर्हिकिंक्रियेत॥तन्मतिश्च

यतांसर्वान्प्रति॥अहोभवंतःसर्वेसाक्षिणःशृण्वंतु॥तांत्रिकः॥यदित

थास्यात्तर्हि॥तवदासोभवेयं॥सोम॥तदिदंभवंतोविमृशंतु॥बौद्धा

द्वयः॥अरेकथ्यतामपवर्गस्त्वदीयः॥तांत्रिकः॥कर्णेएवमिव॥बुद्धाद (६३)

यः॥श्रुत्वाविहस्य॥अयेतांत्रिकवंचितोसि॥पाषंडकापालिकदास्येन

यतः॥सारूप्यरूपंसविशेषमेतन्नसदेहकैवल्यमिदंतदीयं॥एकीभवं

63 त्वत्र भवंत एव न चेत्स राजात्र कलिः प्रमाणं ॥ ततः प्रविशति कलिः ॥२॥ बा
लोप्ययं पटुरिति प्रतिबुध्य तत्त्वमाहूय मामरूतकैः प्रणयैरविद्या ॥ मह्यं
वरायसहृशीं कुहनांस्वकीयां दत्वा तनिष्टसुमहत्किलकौतुकं मे ॥ तदस्मा
कि मिव मया न प्रियमाचरणीयं ॥ इति सकौतुकं परिक्रामति ॥ सोमसि
द्धांतः ॥ राजन्कले विजयी भव ॥ प्रतिपद्यतामत्र किंचिदिव दंडनीतिः ॥ ६३
कलिः ॥ तत्किंनाम ॥ सोमसि ॥ तांत्रिकोयं चोरितमदीयपुरुषार्थः मध्यस्थो

रध्यवसितप्रमोषप्लवा॥प्रतिष्ठितंतुनानुतिष्ठन्ति॥ कलिः॥जना॥ अयेतां
त्रिकोयंवैदिकःश्रयते॥ नत्वकथमसावभिभावनीयः॥सोम॥यद्येवंमन्य
सेतर्हिश्रूयतां॥वयंयथाभैरवागमानुरोधेनवेदप्रामाण्यवादिनोवेदवि
रुद्धमधुमांसादिनिषेवणाभिर्वेदबाह्यतयापाषंडेषुगणयामहे॥तद्व (६५)
दिमेपिपांचरात्रागमानुरोधेनवेदप्रामाण्यवादिनोवेदविरुद्धैराचा
रैःपाषंडाएव॥किंच॥द्विविधाइमेतांत्रिकाःउदीच्याःकेचित्अवाच्याः

परइतिनञतावद्दवाच्यानामपाषंडास्ते पशव एव॥ यतः॥ अप्राकृता
नकृतकानपहाय वेदान्तन्त्रातिभद्रविनिवेशितनीचभाषाः॥ कर्म
त्यजंतिविहितंविहितेतराणि निर्माल्पपैतकमुखानिवितन्वतेच॥ हंत
बुद्धेरूपरिप्लवता॥ आचार्यहस्ताद्धिगम्यचीरं निबध्यकंठेकुणप
स्पहृष्ट्वा॥ वैकुंठवीथ्यांगृहनिश्चयेन नंदंतिमूढाः पशवोनकिंते॥ कु ६४
त्लिः॥ तदहमप्येवमेनंप्रतारयामि॥ अयेप्रतिश्रुतंपाषंडद्दास्यमनुति

परि

ष्ठपरयावैकुंठेशमलभूमिंसरे ॥ तवनिवेशनायवीटिकामहंप्रहि
णुयां ॥ तां ॥ समयं ॥ राजन्यद्रोचते भवतस्तद्दाचरामि ॥ कल्किः ॥ पुरो
विलोक्य ॥ उत्तुंगद्विपकुंभकर्कशकुचाभोगारणन्मेखलश्रोणीमं
द्दलभारमंथरगतिः कंदर्पदर्पोद्धता ॥ उन्मीलन्मदिराविकारविव (६५)
शव्यालोलतारेक्षणा स्निग्धालोकनमोहिनी विलसतिश्रद्धापुरस्ताम
सौ ॥ विचिंत्य महाप्रभावाह्येषा ॥ शास्त्रं किन्विदमप्रमाणमिह किं न प्री

यतेदेवतासाप्रीतायदि किंकुहापिभुवनेदुष्प्रापमेकंभवेत॥भोगा
नत्रबहूनग्रहायपरतःकैवल्यलक्ष्मीप्रदेसद्यःसिध्यिपदेजनःकुलप
थेकस्मान्नसन्नह्यति॥इत्यादिनानाविधसाधनबोधनैर्यपामरपं
65 डितमखिलमपिजनमिहकुलपथेममोल्लवइवनिविडयंतीदृष्टि
पापथमप्रचारेणवितथमिवकृतवती॥अथिष्वधेपरिगृह्यतामयं ६५
तांत्रिकः॥अधा॥तथेतिगाढमालिंगति॥तांत्रिकःसुखपारवश्यमभि

नयन्॥ स्वर्गो दिवः किं गळितो यमुर्व्यामुर्व्येव किं स्वर्गदशां प्रपन्ना॥ स
त्वातिरेकक्षरदात्मतत्वं विश्वं किमानंदमयं विधत्ते॥ इति श्रद्धापर
रवशो दासोहमिति साष्टांगं प्रणमति॥ रा॥ स्थाने सांप्रतमस्यान्वा
य्यतया दासत्वमितरथा॥ ब्राह्मणो दास इति विप्रतिषिद्धमेवैतत् (६६)
कलिः॥ द्विष्यायम प्रयासतः प्रामाणिको दासलाभः॥ सोम॥ राजन्ने
वमेव लाभांतरमपि नः सन्नमति॥ पुरतो निर्दिश्य तिर्यगतिर्यग्विह

क्लितपरिणतपृथुकारवल्लिभङ्गाभिः॥मुद्राभिर्जटिलतनुर्दग्धो माधवो
यमापतति॥माधवसिद्धान्तः॥अयमखलु लवंगिकायांघृतशौचप्राय
60 श्चित्तांगमभिनवतीर्थस्वामिपादैः श्रीवैष्णवसमाराधनं क्रियत इ
ति निशम्य श्रीमुखतोहमागच्छामि॥ऊर्ध्वमवलोक्य॥तदितो यावत्स
मयानतिपातमाचार्यस्वामिपादवंदनमाचरणीयमिति ससंभ्रमं प ६६
रिक्रामति॥कापा॥कलिंप्रति॥राजन्य एषः॥अंसे बिभ्रद्दर्भदुर्भर

भरांघोर्णीमधुष्ठीलवत्क्षुद्रम्लेछमुखालुसंकुलकरःप्रारब्धवायुस्फू
र्तिः॥ अंकूरानिवपापनामविरजान्यंगेमषीलांछनान्पाविभ्रच्च कि
तोवलीमुखस्ववोहयग्रसुतंहिंडते॥ अयंतावदुराचारैस्तोपिवेदबा
ह्यः॥ कलिः॥ कथमिव॥ कापालिकः॥ उपवासदिनभ्रांत्या मप्येषक्कि ६८॥
लडुमतिः॥ ननुहोतिनदत्तेवापितृश्राद्धंचमुंचति॥ किंच॥ स्नानंसां
ध्यविधिर्जपोथहवनंस्वाध्यायमाध्याह्निकेदेवाभ्यर्चनमित्यमन्यवि

कलंकृत्यानि निर्वर्तयन्॥ सद्यःस्नातरजस्वलाकृतपतिश्राध्देमिनद्वाहशी
काष्ठाभ्यंतर एव पारणामयं कृत्वा चिरान्निर्गतः॥ कलिः॥ हंत सम यो वै
दिकाचारो पाषंडस्य माध्वसिध्दांतस्य॥ प्रशिष्यतामपि नार्हस्ययं मूढः॥
तिष्ठतु वराकः किमनेन॥ जीवराजः॥ सखे चित्तशर्मन्नमीषां मुखान्यन
वलोकनीयानि॥ तदितो वामेतरेणैव पथा मृगयाविनोदिनो वेदारण्य
मधिगच्छामः॥ पाष॥ अप॥ परस्परमुखान्यालोक्य सनिर्वेदं॥ मतांत

रेबलवद्भिर्निवेशितोयमप्रधृष्योस्माभिरितोयथागतमपसरामः।

अवि॥ उनांतिकं॥ अयि विषयवासने॥ दृष्टानिखलुवस्तूविचारदु

र्व्वेष्टितानिपाषंडेषु॥ एवमग्रेपिशमादिभिरुपनिपत्यय दि किलरा

जायमुपरुध्येत॥ तर्हिसुमहत्किलसंकटमापद्येत॥ तदितोवयमयत

एवगत्वास्यस्यासन्निधापयमानैर्मोहादिभिरस्मदीयेःशमादिप्रचारो

परोधायनिपुणतरंकिमपिसंविधातव्यं॥ विष॥ साधुचिंतितंभद्रि

(६८)

न्या॥ अविद्या॥ प्र॥ यावदमीवयमनुनेवपथा किंचिदतोगच्छामइति
निष्क्रांताः सर्वे॥ ॥ चतुर्थोंकः॥ ॥ ततः प्रविशतिसहपरिवारेर
68 विद्या॥ २॥ हंततदेवमतिमहतिसंकटेनिपत्यकरणीयतावि मूढामि
हनकोपिमामुपसरति॥ नेपथ्ये॥ रतिकंकणपदमुद्रितरमणीयशि
रोधरालिमैः॥ घुसृणाद्रवहरिणमदैर्घुमिघुमितानामुखसमरोजयति ६८
अवि॥ श्रुत्वासहर्षं॥ अयेकामः संप्राप्तः॥ ततः प्रविशतिकामः॥ २॥ का

मांगे व द नेच व ल सि विरा द णो ण पालां ह नाब धा ना म प ता कि का स्त्रि या
य न ब्रह्माच्युतानाम पि ॥ संत्वन्ये बत के पुन र्हि विष दो म च्छा स नो ल्लंघि
न स्त त्वा द्द गि भ व स्प मे त्र मनुजाः के नाम की टाइ मे ॥ पुरो विलोक्य ॥ इ
य मितः स परि वारा देवी ॥ उपसत्य विजयतां देवी ॥ देवी ॥ इ त आस्य (६९)
तां ॥ का मः ॥ उप विश्य ॥ का चिं ना म यि वा नि षी द तिज ग द्वी र दि शां जि
त्वरे ये नार्थः पुरुष पा वो भि ल षित स्तं ब्रू त किं चिन्मम ॥ दि क्पा लं दु हि णं

(६९)

मुकुंदमधवासाश्वान्महेशंक्षणान्निर्जित्यप्रमद्राकदाश्वविशिखैः कुर्वे
भवत्किंकरं॥विष॥भद्रिनियद्रिकिलानेनकर्माण्यवरुध्यानितत्रशा
69 माद्देरुच्छ्वसितुमपिनभवेदवकाशः॥प्रव॥भद्रिनिविवेकोविरागमु
पनिधाय्ययद्रिकिलकामानवरुध्यमेवकर्मकारयतितर्हितत्रकिम
प्यंतरमधिगम्यस्रद्रितितद्दिघटनेकःसमर्थोभवेत॥श्रवि॥विचिं ६१
त्य॥पुरोहभ्यतां॥कोपःसएषकुटिलभ्रुकुटीकरालंवक्त्रंदधहूमदिवा

(८०)

स्तगावेक्षपोन॥ उद्दंडदंडधरचंडतराभर्दीकमभ्येतिविभ्रमविलास
कथानभिज्ञः॥ ततःप्रविशतिक्रोधः॥२॥ धर्मःकश्चनकामनानधिक्र
तस्तेनास्मदीयाःपराभूयेरन्ननुवेपतेममवपुर्हताहमाविर्भवन्॥
दृष्टःपूर्ततपःशतान्नपरमोत्सेधंतुतल्लंचयंत्तलस्तोममहाचलंपवि (८०)
रिवप्रध्वंसयेद्दृश्यतां॥ उपसृत्यविजयतांदेवीत्यभिमुखउपविश
ति॥ विषय॥ भद्दिनियथाप्रायशोधर्मएवकुहापिनप्रवर्ततेतथावि

धातुं कः प्रगल्भेत ॥ देवी ॥ चिंतां नादयति ॥ नेपथ्ये ॥ एहि या हि यथाका
मं ना हि तं ते न किंचन ॥ देहि वाचमिमां नैव ब्रूहि मां प्रतिज्ञात्व पि ॥ पि
तरौ वा विपद्येतां जायतां वा सुता युतं ॥ मित्रं तु वा परागाश्च मिथो द द्या
न्न किंचन ॥ देवी ॥ श्रुत्वा ॥ ननु संप्राप्त एव तादृशो लोभः ॥ ततः प्रविश
ति लोभः ॥ २ ॥ अभ्येतु घोरवपुषा धुरि राक्षसो वा दंष्ट्राकरालवदनः स्व
यमंतको वा ॥ चेतो बिभेति न तथा मम दुर्निवारदृष्टे यथार्थिनि स पुस्त

कर्हर्भपाणो॥परिक्रम्य॥उपसत्य विजयतां देवीति पार्श्वतो निषीद

ति॥विष॥लोभं निर्दिश्य॥कुणस्त्वणां वाजगतां चये पिन देयमेतस्य द

शास्ति किंचित्॥न हर्षद ख्यातु किमप्यदेयं मही विशाला मणिपर्वतो

वा॥पुरो विलोक्य हंतस्मरतमात्र एव सन्निहितः॥यदेषः॥हस्तेनानुप

दं प्रियस्य सुहृदो हस्तं समास्फालयन्न् हासोत्ताळसमुल्लसत्कळकळः सं

फुल्लवक्त्रांबुजः॥हूरीकृत्य विषाददैन्यजडता चिंतादिभावान सावुत्सा

(२०५)

हेन सहात्मजेन वलतेहर्षोतिमात्रोत्सवः ॥ ततः प्रविशतिहर्षः ॥२॥ वध्यं
चवारणपतेर्निर्द्धामिकंठकुर्वेचरत्नपटलीकनकाभिषेकान् ॥ नप्रा
णतोहिपरमस्तिशरीरभाजांतानप्यहंतृणमिवप्रतिपादयामि ॥ इति
परिक्रम्यविजयतांदेवीतिलोभस्यप्रतीपमुपविशति ॥ विषय ॥ अये
हर्षभवदनुजन्मामदः किन्नदृश्यते ॥ हर्षः ॥ अयतोनिर्द्दिशान्नितोदृश्य ७१
तां ॥ आलिंगितोयमवधीरणयारमण्यापुत्रैःप्रमादविपदस्मरणोःप

रीतः॥ हूरीकृतो विनयधर्मविचारगंधैः सोयं मदोजयति मंधरहृष्टिपा
तः॥ ततः प्रविशति मदः॥२॥ उन्मीलिताकानमुदग्रसत्वं मदावलं भूरि
मदांधमेतं॥ वालेसमालंब्य बलाद्धि कर्षन्निवर्तयेयं धुरि निस्सरंतं॥
इति विकटं परिक्रम्य हर्षोपकंठे निषीदति॥ प्रवृत्तिः॥ भद्रिनि यथाह्वयं (८२)
धर्मातिक्रमादिनाकीदृशमप्यस्मदधीनं करोति॥ तथैव मानोपि महद
विनयादिनाकमपि मदधीनयेदेव॥ तथाह्येषः॥ विगर्हितनमोवाकोवि

नयादिपराङ्मुखः॥ आहोपुरुषिकाप्रेयानायान्मानोमहोच्छ्रितः॥ ततः प्रविशति
मानः॥ इष्टापूर्तसहस्रलब्धपरमापूर्वातिपूतात्मके विज्ञानातिशयप्रभूतवि
भवे विश्वैकवंद्येमपि॥ वेष्टंते तिलयंत्रनद्धवृषवत् किं केपि देवालये वं
द्यंते वत कैलासवच्च शिरसः किं त्वं चितो द्रं चितैः॥ इति परिक्रम्य विजयतां दे
वी तिक्रोधसमीपमधिवसति॥ विष॥ महिम्निलोभादिमहिम्नाकर्मकुह
पिप्रायशो नानुलिष्ठेदेव॥ कथंचिदनुष्ठितान्यपि परातिसंधानेन विफल

५८

यतापिकेनचिह्नवितव्यं॥प्रा॥पुरतोनिर्दिश्य॥सोपिसन्निहितएवयदेष:
सौवर्णलेपनघगाधृगितांशुजालमापादचूडमयमाभरणंदधानः॥वि
ष्टब्धमूर्तिरतिधीरगतिःप्रसन्नोमिथ्याविलासरसिकोमिळतीहडंभ:
ततःप्रविशतिडंभः॥१॥इंद्रःकुबेरइतियेमहिताःसुरास्तेबाह्यांकणे
निविडयंतिनिरंतरंमे॥एतेषुमेयदिहिकिंचिदुदंचितभ्रूःकिंकिंन
सिध्यतिजनस्यमदाश्रितस्य॥इतिपरिक्रम्यविजयतांदेवीतिसर्वेषा

(७३) ७४

मग्रतस्तिष्ठति ॥ विष ॥ भर्तृनितदेतेषांक्रियासिद्धिषुमहाप्रभावोमोहः
सहकारी ॥ ततःप्रविशतिमोहः ॥२॥ देवींप्रणम्यतदंतिकेनिषीदति ॥ प्र
व ॥ भर्तृनिश्रूयतां ॥ येसंसारपथंविचिंत्यवितथंतत्त्वावमर्शोन्मुखाः
सन्नह्यंतिमदंशमनागपिनिशोराकर्णितेञ्चंदिते ॥ हित्वातत्त्वकथामपा
स्यनियमानुन्मुत्सधावंतितेमोहःसोयमलंघनीयमहिमाकेनैषजय्योभ 13
वेत् ॥ विष ॥ तदेवमपारबलविभवसारेषुनिजपरिवारेषुकिमसारवि

(२०४)

षयिणीभिराशंकाभिरात्मानमाकुलयसि॥ अवि॥ भोः कामाद्द्यः अयतां
निजकुलसमापतितविकटसंकटविघटनाय हितकार्यघटनाय चायम
वसरः॥ अतो मया किंचिदभिधीयते॥ तदवहितैरेव भवद्भिराचरित
व्यं॥ कामादयः॥ यदाज्ञापयति देवी॥ अवि॥ सहजसिद्धविरुद्धस्वभा
वशमदमादिकृततदुर्बोधनेन मयि विरसीकृतात्मा देवश्चित्तशर्मयासा
कमत्र परिसरे निमिषमात्रएव सन्निदधीत॥ ततः एवमेव विदितशि

वतद्भक्तिप्रभावैर्युष्माभिरप्रमादमेवनिजनिजपरिवारैःसममयमुद्देशः स
र्वोपियाशमदमादीनामीषदुल्लसितुमपिनावकाशस्तथानिबिडयितव्यः
प्राप्तावसरमेवपराक्रमयिष्यामस्तावत्॥यदादिशन्तिभट्टिनीतिकामा
दयोनिष्क्रामंति॥ततःप्रविशतिचित्तशर्मणासहजीवराजः॥राजापुरो
विलोक्यकथमत्रैवसपरिवारादेवी॥सर्वाःससंभ्रममुत्तिष्ठंति॥प्रव
देवकियच्चिरमभूदस्माकमिहागतानां॥राजा॥चित्तशर्मन्नितोपि कि

यद्दंतरेवेद्दारण्यभागाः॥ चित्र॥ ननुप्रविष्टएव॥ यद्दिद्दानीं॥ स्फायंते एष
द्दाज्यगंधिन इमे वाताः क्वचित्तुत्रचित सर्पिष्मच्चरुशंसिनः क्वचिदपिस्नि
ग्धावपामोदिनः॥ एते चानुपद्दं पयोद्द पटलीसोद्दिस्पनाद्दिंधमाधूम
व्योमपथंतरंति मखभुक्संचारनिश्श्रेपिकाः॥ अपि चात्र॥ प्रक्रीडच्छु (८५)
कशारिकाद्दिपटलीशाश्वत्समाश्वाविंतप्रत्याश्वाविंतमुह्यद्दत्विगपथ
प्रक्रांतिसंद्देद्दतः॥ एतेजाग्रतिसाग्रद्दाः सुमतयः सभ्याः समं यज्वभिर्वै

दुष्यप्रथनायवागावसरोचित्यप्रतीक्षाकृतः ॥ यावदिहप्रविश्यचक्षुषी
विनोदयामः ॥ तइतिसर्वेतथाकुर्वंति ॥ राजा ॥ समंतादवलोक्यसानंदं
विहितेष्टयोमतिमतांपर्वसुकाम्यक्रियाएताः ॥ प्रमदाइवरवलुरमयंत्य
क्षय्याएर्वसंपदुल्लसिताः ॥ अपिच ॥ विहरंतिविस्मयनीयाकुहचनसो
त्रामणीलक्ष्मीः ॥ संपूर्णसोममुख्यस्फीतरसाध्वक्रियाःक्वचिद्भांति ॥ विम
भ्य ॥ कमलोल्लासिपद्मानांकमनीयविचित्रभरिभोग्यानां ॥ आसांकामप

७६

रिस्फुरद्दमरतं मुखमातनोति सुखं॥ विष॥ जनां॥ सखि प्रवृत्ते कामयुक्ति

यायामासां निर्वर्णनेन तत्फलप्रशंसया च कामाविष्ट इव दृश्यते देवः॥

प्र॥ ननु महाप्रभावः कामः॥ चित्त॥ स्व॥ हंत प्रमादः दुरात्मना कामेना

भिभूयमानः सर्वाजनमन्यतोवकर्षयीयो देवः॥ प्रका॥ पद्दांतरएव ७६

परिणतफलरागमभिमंप्रदेशमासाद्य विश्रमसुखमनुभूयतां देवेन

राजा॥ तथेति किंचिद्दन्यतोगत्वा॥ परतो निर्दिभ्य॥ शास्त्रस्तोत्रमयीर्गि

रःक्रति पुटीसौ हित्यनाडिंधमा वैताना निहपावकान्स्तत्र्यरी किंजल्कि

तायानपि॥ अंगान्युत्सुककानिमे विदधतः प्रतांश्च वातानिमान्हातुं

76 न प्रभवामि पावनहविर्गंधानुबंधानपि॥ अ वि॥ सखि विषयवास

नेलब्धापरित्यागाभिलाषस्वभावेन लोभेनापि वशीकृत इव देवः॥ य

द्यमिमान्विषयान्नपरित्यक्तुमुत्सहते॥ चित्त॥ स्व॥ आः किमिह लब्ध

प्रसरो लोभहतकोपि॥ भवतु निवारयाम्येनमितः पिशुणवद्विषयांतर ७६

प्रदर्शनेन ॥ प्रका ॥ वयस्य किं चिदत्र परभागे दीयतां दृष्टिः ॥ राजा ॥ वि
लोक्य ॥ साश्चर्यं ॥ तटिज्जटिलिता दिशास्तरपि कोटिभिर्भास्यते नभ
स्थलमुपस्थितैरनुपमैश्च तोयत्रिकैः ॥ मनोपि च विनोद्यते मधुसुधा
स्वरीमाधुरीनिरंतरधुरंधरैर्निखिलदुर्लभैः सोरभैः ॥ वयस्य किमेत (८८)
द्विमृश्यतां ॥ चित्र ॥ संकल्पं पश्यति ॥ संकल्पः ॥ विचार्य ॥ देव कामो
पासनाः संधीमयमवदनुजिघृक्षया सन्निदधते ॥ ततः प्रविशंति

काम्योपासनाः॥२॥ विजयतां देवः॥राजा॥ बृहस्पतिर्मेस कियान्वचः क्रमे
त् दिवस्पतिर्वा विषयेषु मे कियान्॥ इमातुरापास्तपसापि भूयसा यद्वा
विरासन्ननुपाध्युपासनाः॥ इ निरुध्योरस्तटमविनीतस्तिष्ठति॥ चित्र॥
खग॥ विनीतोयं विभुर्हंतवितनोतिविकत्थनां॥ महतामपितुष्टात्मा मा
नोहिदुरतिक्रमः॥ प्र॥ वयस्यसविनयाद्दरमिमामहोपासनाः॥ यथोचि
तमर्हणीयाः॥ राजा॥ तथेति॥ समयंपरावत्यसप्रश्रयाद्दरमभ्युद्गमंना

टयन्यथोचितं संभावयति॥ संकल्पः॥ पुरतोनिर्हिभ्य॥ इष्टांगलक्षित
रतिक्रमशोभिते षाभ्रंगारिणी विजयते धुरि वामहेव्या॥ आयुः सुदीर्घ
मभिनंद्यगुणान्कुमारान्हृद्यां च कीर्तिमियमातनुते हि विद्या॥ चित्त॥ (६८)
उपपद्यत एव॥ क्वत्वंगमन्तर्हिंकारप्रस्तावोद्गीथप्रतिहारनिधनेषुयो
षित्दुपमंत्रणसहशयनाद्यभेदप्रतिपत्तिरूपेयमंगावबद्धोपासनाब
हुफलं कल्पलतेव कस्य वा न मनो हरति॥ राज्ञा॥ सरोमांचविकसितकपो

लं चित्तशर्मणोहृत्तमास्फालयति ॥ विष ॥ किमिहापूर्वार्थसंदर्शनज
नित चित्तविस्तारात्मकोहर्षोपि ॥ दृष्ट्या दृष्ट्या ॥ चित्त ॥ हंतहृर्षेणमह
78 ता विष्टोवयस्यः ॥ यदि किल एतत्स्रलिनियतवृत्तिरत्रमरोपिसल्लिद
धीलततोति हि नामसंकटमापद्येत ॥ नदिममन्यतोमुखयितुमेवंब्रवी
मि ॥ प्रका ॥ वयस्यपार्श्वतोहीयतां दृष्टिः ॥ राजा ॥ अश्रुतिमभिनयन् ग ७८
जमीलनानिकरोति ॥ विषय ॥ पुष्कलोयमस्मिन्मदावेशः ॥ चित्त ॥ आ ॥

(79)

आः प्रमादः प्रमादः ॥ कथमेनमितोहमभिमतमुद्देशं गमयेयं ॥ संक
ल्पमवलोक्य संकेतयते ॥ संक ॥ देव महदत्र किंचिदस्ति सौभाग्यं ॥ रा
जा ॥ किमिव ॥ संकल्पः ॥ रचितरुचिरशोभाऋग्यजुःसामपुष्पैर्दुतनि
गमरसौघप्रस्फुरद्दिव्यरूपा ॥ सदमृतवसुरुद्रादित्यसाम्राज्यदात्री विलसति
मधुविद्यावीतदोषातदेषा ॥ चित्तश ॥ स्मरणामभिनीय ॥ श्रूय
ते हि ॥ दिव्यमधुमूर्तेरादित्यस्यांतराम्नाय रसरूपममृतमग्न्यादिमुखेन

वस्वादयोदेवाहल्वैवाभिनंदंतितदेवरूपंप्रतिपद्यंतेतत्तएवचोद्यं
तियस्त्वावदेतदमृतमेवंवेदसर्ववस्त्वाद्यन्यतमोभूत्वातत्साम्राज्य
मविनाशित्वमपिपर्येतीति॥राजा॥स्वरूपमहिमफलान्यनुसंद
धानःसौवर्गसुखचिंतांनाटयन्॥नेदीयःसुरदीर्घिकातिशिशिरेक
ल्पद्रुपुष्पोत्करैःस्फारामोदिनिमारुतेविवलतिप्रासादभृंगोदरे॥पुं 79
भावालसमव्यदिव्यमहिलाबिंबाधरास्वादनेतत्त्वादृङ्मुखवैरवरीशि

वच्छिवप्राप्येतवाज्ञात्वपि॥इतिमुह्यति॥विषयवासना॥भद्रिनिमधु
विद्यायांभजतिव्यामोहमेषनोदेवः॥अविद्या॥केनैषलंघनीयप्रसरः
समयेमहामोहः॥चित्त॥स्व॥हंतनितांतमभिभूयतेवयस्योमोहेन॥
प्र॥देवबुध्यस्वबुध्यस्वधीरःखल्वसि॥राजा॥प्रतिबुध्यते॥चित्त॥स्मृ (८०)
तिमात्रतोपियस्याःकमपिविकारंप्रतिपद्यतेदेही॥आसादितायदिहि
सामदयतिकंवाविवेकिनंत्वेषा॥राजा॥श्रुत्वासप्रत्यभिज्ञं॥नैषाविवे
काद्यभिमताविद्या॥अतएवकिलाविवेकिनमेषामदयतीतिवयस्येन

चित्तशर्मण्यासव्याजमभिहितं ॥ प्र ॥ परतो विलोक्य ॥ संकल्पकेषामहा
भागा ॥ चित्त ॥ स्व ॥ हंत विवेकादिस्मृतिमात्र एव प्रकृतिमासादितो वय
स्यः ॥ संक ॥ कमपि हृदि दधानाकांतरूपं महांतं तदुपरि निदधानाभाव
भेदानशेषान् ॥ इयमपहतपाप्मा सत्यसंकल्पकामाजयति दहर वि
द्यासद्गुणैः श्लाघनीया ॥ राजा ॥ स्व ॥ सगौरवं साहरं च ॥ पदमाज्ञांतरै
वरवल्लिवियमात्मविद्यायाः ॥ यदपहतपाप्मत्वादिकतिपयगुणारोपए

(८१)

च विशेषः॥ चित्त॥ जनांति॥ वयस्य तदस्या दहर विद्यायाः पदांतरएव
तत्र भवत्याश्शिव भक्त्या निरतिशयनिजप्रभावेन॥ भवदभिलषित
परमानंदकंदली विद्यापि भवद्दक्षि पथैकगोचरतयानुप्रवेशितास्मात्
81 तदत्र सावधानं दीयतां दृष्टिः॥ यतो महामोहादयस्तद पवारणाय स (81)
न्नह्यंति॥ राजा॥ निभृतं निरूप्य विद्यामुपलभ्य॥ स्व॥ हंत सेवेयं नय
नानंदचंद्रिका॥ वयस्य किं ब्रवीमि॥ पुरा किल॥ एषा चित्रगता मनोह

नवतीसौंदर्यसारोद्भवैरानंदैरतिमोहिनीकिलदशामातन्वतीकामपि
स्यादेतत्कर शिल्पमुद्भितमिदंचित्रंकिलेत्याश्चितंतत्तस्याःकरशिल्प
मल्पितवतीसैषातिहृद्याकृतिः॥ चक्षुरामीलय संमोहंनाटयन्॥ प्र॥
अंगेनैवकिमच्चिरादिभिरहंनीतास्मिधात्रुःपदंकिंवामसुकृतैरसावि
यमिमौलोकौविपर्यासितौ॥ हंतैतन्मुखचंद्रमःअगुपानादुत्कूलितेयंव्य
थाद्यात्मानंदसुधासमुद्रलहरीविश्वंकिमेकार्णवं॥ अपिच॥ सुषुप्ति

(८२)

र्वाञ्चित्वा स्विक हृदय विश्रांतिलसिता मद्दो वा मोहो वा घनसुखमयः

कोप्यभिनवः ॥ निरुंधानो बाह्यं करणपटलं निर्नु तज्जगत्प्रकारः कोप्यं

तःप्रसरति विकारो मनसि मे ॥ इतिस्तंभं नाटयति ॥ विषय ॥ जनांति ८२

कं ॥ भट्टिनि दिष्ट्या फलितस्तेन नु मनोरथः ॥ यद् इयमासामुपास नानां

प्रभाव विलसिते रति मात्र पर्युत्सिकितत्प्रमोदभर विकसितवदना

रविंदश्चिरेणापरवानास्ते ॥ पश्यता वत ॥ प्रावृषिनी पटु मरवपरि

तस्तबकैरुद्यत्कुड्मलितैः॥ अंगैरविरलपुलकैराविष्कृतसत्वविक्रि
येल्लसति॥ अविद्या॥ अपि विषयवासनेदेवस्याविकारोयमुपास
४८ नासक्तिनिबंधनइति मनो मम न प्रत्येति॥ यदिह मद्विषयकप्रण
यगौरववगाधोपिनोपलभ्यते॥ विषय॥ किमन्यदिह कारणं संभा
व्यते॥ राजा॥ सोन्मादं॥ मधुलहरीनयनपथेममिलिताकापिवि ८२
द्येति॥ दृष्ट्वाभिनंदितासातन्मयमास्तेजगत्समस्तमिदं॥ अविद्या॥

(४३)

विषयवासनेच्छतं खलु देवस्य विद्यानुरागसम्मोह पल्लवितमेतत् ॥ विषयवा

फलितमिवतेसंदेहेन ॥ भवतु भयोपि साधु विमृशामः ॥ चित्त ॥ स्व ॥ हंत प्रमा

दः ॥ तदिदमस्य विद्यारलिपारवश्य विजृंभितं ॥ वयस्यस्यजल्पितमेवमन्य

थयामि ॥ प्र ॥ देवि दृष्ट्या बलवदुपासनासक्त हृदयो देवः ॥ अतः किलमधु (८३)

लहरी दृष्ट्वाभिनंदितेत्यादि मधुविद्यास्वरूपगंधिनी वागस्यप्रसृता ॥ वि

षयवासना ॥ भद्रिनि विमर्शविषय एवायमस्य विकारः ॥ अविद्या ॥ कामं

विमृश्यतां ॥ ममतु न संदेहः ॥ विद्यानुरागोन्माद विजृंभितमेवैतत् ॥ हंतव

हिःप्रवृत्त्युपलंभायप्रहिताकिमद्याप्यसूयाचिरयति॥ततःप्रविशत्यसूया
२॥राज्ञानंप्रणम्यदेव्याःसमीपेनिषीदति॥देवी॥अपवार्य॥अयेअसू
येकाम्योपासनादर्शनप्रकरणेकिमतिपर्युत्सुकितस्तब्धइवदृश्यतेदे
८३ वः॥तत्किमत्रकारणंभवेत्॥असूया॥देवितदिदमेववक्तुमागतास्मि
प्रवृत्तिः॥कथमिव॥असूया॥तत्रभवतीशिवभक्तिरेतास्वेवोपासनासुवि ८३
द्यामपिराजमात्रदृश्यामनुप्रवेशितवतीतिततस्ततःसंचरंत्यामयाश्रुत

मम्भूत॥ प्रव॥ युज्यते हि तादृशो श्रुता दृशो महानुभावः॥ अविद्या॥ हंत
किमिद मायतितं॥ अभिमतसिध्ययेयत मानायास्मन्यतीप मुपनमितं
दैवेन॥ तदितोपकृष्य विषयांतरप्रदर्शनेन देवो विनोदयितव्यः॥ प्र
का॥ महाराज स्थिरप्रणयेन मभवितानि कामममभिनंदितास्मि॥ किमतः
परंममप्रियमास्ते॥ चित्त॥ जनांतिकं॥ हंत तदुक्तिरेव तदनर्थ निदर्शन
तयाप्रवृत्ता भवत्वेवमेव॥ अविद्या॥ तद्यतागच्छामि॥ सुचिरमिहय

(२८)

रिश्रमणपरिश्रांतमात्मानमवस्थापयितुंनपारयामि॥राजानंचिरंनिर्व
र्त्य॥मामेवंविविधोपभोगललितामुत्सृज्यक्विंलप्स्यसेभयत्याग्निवसा
दृशापरिणामेदात्मावशेषीकृता॥वंच्चांतेकरणान्यमूनितुपरंकिंतत्र
पश्यन्सुखंसाकूतस्मितकेलिलोलनयनंबिंबाधरंपास्यसि॥किंच॥न
वाङ्नरूपंनरसोनगंधोनस्पर्शनंवासुखहेतुरस्ति॥भवानहोकंगुणामा
कलय्यविघेतिसन्मुह्यतिवानजाने॥इतिसकोपासपरिवारागंतुमिच्छति ८४

राजा ॥ सभ्रूभंगं ॥ किमये चित्तशर्मन् विद्यामधुकृतं मम मोन्मादमियद्
तिभूमिंगतमुपेक्षितवानसि ॥ अतः किलैवमकांडे दुर्मनायते देवी ॥
चित्त ॥ वयस्यायं दूर्थ्योयमारंभः ॥ अथवा ॥ मोहस्य किल संवेगः केनापि
न निवार्यते ॥ को निरुंधीत वावेगं नीचप्रवणपाथसां ॥ राजा ॥ स्व ॥ स
म्यगनुशासितोस्मि कामादिप्रवणोहं नीचप्रवणोति वयस्यस्याजसं
बोधनेन ॥ अलमलममीभिरसारोपचारैः ॥ इति सकोपं सपरिवारानि

क्रामति॥ हंत बलवता विषयांतरेण विफलीकृतोनः संरंभ इति समंद्दा
श्समुपासनात्निरोदधते॥ सहैव ताभि र्विद्यापि॥ राजा॥ सखे चित्तशर्म
न् भवतु यथाकथंचिदखिल मपि समयेकथ मपि समाधीयते॥ दुर्ल
भं तु लब्ध मेवनाम॥ तदितः परम विळंबित मेव कार्यसिद्धौ व्यापर्त
व्य मस्माभि रितिनिष्क्रांतास्सर्वे॥ ॥ पंचमोंकः॥ ॥ ततः प्रविशति
चित्तशर्मा॥ श॥ अद्य खलु दहरोपासनादिभिस्सह विद्यादर्शनप्रभृति ८५

निकाममस्वस्थहृदयो महाराजः॥ तथाहि॥ विश्लेषव्यथया चिरेण हृद
यानुस्मृतया कर्शितो निश्वासेन घनोष्मणा मलिनयन्नोष्ठं निसर्गारुणं॥
प्रम्लायन्मुखपंकजो न भजते निर्वेशलेशं मनागंतःकोटरलग्नपाव
कइव श्रीखंडशाखी चिरात्॥ एवमेव महाराजदर्शनप्रभृति सा विद्या (८६)
पि नितांतदुःसहेन विरहसंतापेन परिभूयत इति बहुधा श्रूयते॥ तथा
हि॥ नैदाघोष्मनिमीलदुत्पलदृक्छायामुषी चक्षुषी ज्योत्स्नाहीनशरत्सु

धाकरसरवंवीतप्रसादंमुखं ।। उद्गतप्रसवेवलोध्रलतिका धत्ते तनुः पांडुता
मंगैरेव मनंगतंत्रललितैरास्ते विनिद्रा चिरं ।। अपि च ।। आलीभिः किल
ज्ञायितामरलकस्निग्धेन जिन्मादकेपाथोबिंदुरिव प्रकामतरकाबाला
धिकं म्लायति ।। सिक्ताश्चंदनबिंदवश्च रुचिरायंते स्तनाभोगयोर्मुक्ता
भांतिचसुभ्रुवस्तबकयोः सक्ता मिलिंदा इव ।। अतो न विकंबसहादशे
यमस्या इति करुणयामैत्रीमुखादभिधायप्रेषितं ।। तदनयोरितरेतर

प्ररोचनविषयेयत्नोऽत्र विधेयएव॥ परंत्वस्याभिहितवृत्तांतश्रव
णाप्रभृतिनितांतपरिकुपितालावद्विघावकथमिवसमाधेयास्या
त्॥ विचिंत्य॥ हंतलब्धोयमुपायः॥ तदेवंसमाधास्ये॥ अग्रतोव
लोक्य॥ कथमस्या॥ ततःप्रविशत्यसूया॥२॥ प्रेषितास्मिदेव्याह
मविद्ययाश्चित्तशर्माणमभिधातुं॥ तमहंक्वपश्यामि॥ पुरोवलोक्य
दिष्ट्यासोयमितएवाभिवर्ततेचित्तशर्मा॥ यावदेनमुपसर्पामि॥ उप

८०

सत्य॥ आर्य देवी समाज्ञापयति॥ वयस्य तदेवं देवो मयि विमुखतां प
तिपद्यमानो विमतासक्त एव ननु शाठ्यमवलंबते॥ भवतापि न खलु क
87 श्चिद्दिहोपायश्चिंत्यत इति॥ चित्तशर्मा॥ अये मद्वचनादुच्यतां देवी
असूया॥ किमिति॥ चित्तशर्मा॥ प्रकृतिकोपनायास्तव निकाममकार्क
श्येन वैरस्यमुपलभ्य निर्विण्णः स्वयमपि राजा बहद्वारण्य परिसरे कु ८०
त्रापि शिवक्षेत्रादिषु तापसैः सह चिरं निवत्स्यामीति चिंतयन्नास्ते त्वं पु

(८८)

न रे वं मामुपालभसे ॥ किमहं करोमि ॥ भवतु क्रियतामेवं ॥ त्वया किंचि

त्कालं सह परिवारेण कोपागारमनुप्रविश्य स्थीयतां ॥ राजैव यदि प्रसाद

नाय कदाचिदागच्छेत्तदापि सरकतया स्थ इति प्रसादो न करणीयः ॥ तदु

परि सकलमहमेव समीकरिष्यामीति ॥ असूया ॥ यदाज्ञापयत्यार्य इ (८८)

ति निष्क्रांता ॥ चित्त ॥ यावदहमपि विजने श्रृंगारवने मदनरसपर्याकु

लस्य सवयसो महाराजस्य परिसरवर्ती भवामीति । निष्क्रांतः ॥ ॥ प्रवेश

कः॥ ॥ततः प्रविशति क्रोधागारं प्रविष्टा सपरिवारा देवी। सखि विषय
वासने किंयदनुसृतो पि देवो मयि विरसहृदय एव॥ तथा हि॥ यातं तत्प्र
णयानुबंधि गरिमस्फीतं मयि प्रेक्षणं दृष्टं चेत्प्रति वक्ति किंचन परास
क्तं विकर्षन्मनः॥ अभ्याशागतमुत्तमर्णमिव मामभ्यागतामीक्षते चेतः
कुंतति नीरसानुलपनैर्बाह्योपचारैरपि॥ प्रस्तुततापसाधिष्ठितेष्वरण्येषु
तपश्चरामीति वदति॥ किमत्र कर्तव्यं॥ विष॥ देवि माभैषीः॥ यतश्चि

(९०)

त्तशर्मायमस्माकमनुकूलस्तिष्ठति ॥ देवी ॥ विचिंत्य ॥ तेषु तेषु सिद्धक्षे
त्रेषु तपश्चरणाय गते राजनि पराशिवभक्तिरूपेत्यकदाचित्तया सहसं
घटनाय यत्नं करिष्यतीति चिंतातरळितं मम हृदयं ॥ विष ॥ सखि तत्रा
पि किं चिन्त्यति विधानमध्यवसितमास्ते ॥ देवी ॥ कथमिव ॥ विष ॥ भव (९६)
त्वनभिमताया देवि तस्यास्तु भक्तेरनभिमतविधानात्तामसी राजसी च ॥
प्रचरति शिवभक्तिस्तेन ममात्यंतरंगेष्वहितैर्विघटयिष्यतेत्तन्मुखात्त्रय

त्वं ॥ तदेनयोः समुत्साहनाय समये राज्ञः संमुखीकरणाय च सद्य एव विसर्ज्यतां
मसूया ॥ देवी ॥ सम्यगनुचितमेव चिंतितं ॥ असूये सपदि वेद्वारण्यमधिगम्य
तत्र विनयेन तामस राज्ञः सशिवभक्त्योः सविधमुपसृत्य मद्वचनात् ब्रूहि ॥
यदि खलु तत्र जीवराज्ञः समागच्छति ॥ तमभिमुखीकृत्य भवद्विधेयेषु काम्य
क्रियोपासनादिष्वेव सन्नह्यनीय इति ॥ असूया ॥ यद्वा दिशति भट्टिनीति नि
ष्क्रामति ॥ देवी ॥ विषयवासनेतदिकः परमानुकूल्यमुपगात एव महाराजः ॥

ततः प्रविशति चित्तशर्मणा सह राजा ॥ सखे चित्तशर्मन्नपि नाम मया प्रसा
दितापि देवी मामवधीर्य कोपागार एव निवसेत् ॥ चित्त ॥ कः संदेहः ॥ दु
ष्परिहरतया तथाति भर्मिंगमितो हि मया तदीयकोपः ॥ यथा स्वामिकार्यम
नंतरायमेव संपद्येत ॥ राजा ॥ भवतु यावदेनामुपसर्पामि ॥ उपसर्पति
देवी ॥ राजानमवलोक्य मुखं परावर्त्य तिष्ठति ॥ राजा ॥ विसृज सुतनु मौन (८०)
विस्मरेदं व्यलीकं प्रणयिषु ननु कोपः पद्मपत्रोदबिंदुः ॥ अधररवक्तिमे
तद्रागमभ्येति चक्षुर्गमय हृदयमेनं गाहमानासुखानि ॥ देवी ॥ सखि विष

षयवासनेकिमेतैरायासैर्व्यर्जन्तुसयथेऽयं ममकिलस्वभावोयंकीदृक्प्र
पायपदृभ्रतेपिविषये॥मनागदृष्टेशाठ्येमधुनिविषसंपृक्तेऽरवमेक्षणा
ध्वस्तप्रेमप्रसरतिपुनर्ज्ञोनुनमनः॥राजा॥हंतकियदृनुनीतापिप्रेयसी
नप्रकृतिमापद्यते॥देवी॥नमनालोकयंत्येवसभ्रुकुटी चित्तशर्माणंप
श्यति॥चित्त॥साकूतं॥देविप्रसीदप्रसीद॥भवदधीनएवराजाननु
चिरायनिर्विद्यते॥राजा॥हंतकियदनुसृतापिनितांतविमुखीमामवधी

रयत्सेव॥ नद्दहमितःपरमरण्येषु कुहचिदाश्रमपदेषु तापसैस्सह निव
सनुमुखएवतपश्चरेयमिति॥ सकोपाटोपं परावृत्यगच्छति॥ चित्तशर्मा
देवीसंज्ञाय्यराजानमनुसरति॥ देवी॥ अयिप्रवृत्ते वयमपि तदनालक्षि
ता एवराजानमनुसरामः॥ प्रवृ॥ उचितमाह देवी॥ राजा॥ कःकोत्रभोः (६१)
प्रविश्य दौवारिकः॥ अयमस्मि॥ राजा॥ संकल्पवैहारण्यमार्गमादेशा
य॥ संकल्पः॥ इतरतोदेवः॥ सर्वैवैहारण्यगमनंनाटयंति॥ राजा॥ ज

नांतिकं ॥ सख्यं नैव सुखं करास्थितिइनयाजायेत नः प्रस्तुत प्रत्यूहः प्रकृतस्य
सांप्रतमसावुच्चैस्तरश्रेयसः ॥ त्यक्तव्या महतीरुजेव बहुनायत्नेन दैवादृ
सावस्मानुत्सृजतिस्वयं यदिनतु ध्वस्ता निदुःखानि नः ॥ चित्त ॥ वयस्यत
हेतस्य करणं च भवद्दाशयं च विजानतैव मयारुन मेवं संविधानं ॥ रा
जा ॥ प्र ॥ सखे चित्तशर्मन्नपि नाम हृदयानंदचंद्रिका प्रियतमा मयात्र ९१
समधिगम्येत ॥ चित्त ॥ कः संदेहः ॥ अघटितघटनापटीयसी भवदृष्टु

हृयेकतानेमयितवसचिवेनाग्रतिकिमिवनाधिगम्येत ॥ श्रृणुतावत्
संद्दिश्येयदिवत्सलेनभवताकार्येषुकेष्वप्यहंधुर्यामेवहिमंदरस्यशिखया
मेरोःशिखाग्रंधनं ॥ तैलंपाणितलेनिघृष्यसिकताविष्यंहयेयंक्षणात्कां
तासंघटनंमिथःसरसतासंपादनंमेकियत् ॥ राज्ञा ॥ सखेत्वयिसर्वमु ९२
पपद्यतएव ॥ स्मरणमभिनीय ॥ निर्व्याजोपनमदृयासरळयाभक्त्याकि
मप्यद्भुतंकन्यारत्नमदर्शितत्तदिदिवाकाशेविलिल्यपुनः ॥ किन्तुस्वप्नवि

शोषएषमनसःकश्चिद्विकारोथवातत्वंतस्यनवेत्सितत्परिणयेपुष्णातित्व
त्कांमनः॥ अपिच॥ चित्रेणापहृतंतदाकृतिमताचित्तंममाधैंसखेभूयःसा
ममभाग्यतोनयनयोःपंथानमासेदुषी॥ निश्शेषंतदपाहरद्विधुमुखीसर्वैः
सहैवेंद्रियैःप्राणाएवलुठंतिकेवलमिमेगात्रेषुमेसंहिताः॥ सखेचित्तशर्म
न् अपिनामतदेनामधिकृत्यसमवकर्णिताकापिवार्ता॥ चित्त॥ अथकिं॥
राजा॥ वयस्यकथयकथय॥ चित्त॥ अद्यकिलतत्रभवत्याप्रहितामुद्रितामा

९३

मुपेत्यतद्वचनादभिहितवती॥ यथा किल॥ अये चित्तशर्मन्जीवराजस्य

विद्याभिलाषजनितविरहसंतापातिशयः सत्संगेन यथावदिहाभिहितः

अत एव खलु भवता मैत्रीमुखेन जीवराजविरहखेदपरिभवो विधायया (९३)

अपि॥ तदेवमुभयानुरागोपरां कोटिमधिरोहति कार्यस्य विलंबनमनु

चितमेव॥ अतः कथमपि जीवराजो वेदारण्यपरभागमचिरेणैव प्रा

पणीयः॥ अहमपि तदागमनसमनंतरमेव कार्यस्य सिद्धये कृतसंवि

धानामवामि॥ अन्यदपि किंचिदिह कार्यमावश्यकमभिधीयते॥ तद्द्व
हितेन श्रोतव्यं॥ अत्र तावदस्मादनभिमताचारेतामसीराजसीचत्रिव
भक्ती निकाममोजायेते॥ तयोस्तावदेवं हृदयं॥ आवयोरिहजाग्रत्योर
विद्यायानियोगमतिवर्तेत कोनाम॥ सतावदत्रयदि विधिविहितानन्नु
संधीत तर्हि कामनामनुप्रवेक्ष्यतमविद्याया विधेयंकुर्वहे॥ यदिखलुना
नुसंधीत तर्हि तत्प्रत्यवायएवतमभिहत्यमोहादिवशेकुर्यात्॥ ईश्वरो ९३

पि किमत्र कुर्वीतेति ॥ अतः ॥ नह्येतामिह तेन तपं सुखरुचीरुत्पाद्य पर्यायतः कर्मो
पासनजालकेलिमिह नेनेतत्पशरणुद्यतां ॥ देवस्यैव हि शासनानि विधयो नामा
विलंघ्या हि ते भक्तयोः किंतु तयोर्मनागभिमतावाप्तिर्न संपाद्यतां ॥ तदर्थमेवं क (६८)
रोतु ते वयस्यः ॥ यथा ॥ विलासेषासक्तिं विदधदपि तद्भोगविमुखो निरुध्यन् का
मिन्यानि पुणरसिकश्चोचियइव ॥ भजत्वत्रासक्तिं फलमनभिसंधाय चरि
तैरिदं यावद्विद्याधिगममुपदेशोऽस्य भवतु ॥ अतः ॥ यावदहं निवृत्यासम
मीश्वरस्य दौवारिकमष्टांगयोगं प्रहिणोमि ॥ तावदिह वेदारण्यपूर्वभाग

एवमहेश्वरशासनरूपाविधयोपथायोगमनुरोत्स्याइति॥राजा॥हंतकि
यदनुकंपतेनिरुपधिवत्सलाभगवतीशिवभक्तिरस्मासु॥पुरोविलोक्य
हंतइयितावियषकसंकथनरसाभिनिवेशवशादनवगतविप्रकर्षोयम
स्माभिरधिगतएववेदारण्यभागः॥यदत्रशीक्षाकल्पादिनामानः विचित्र
गहनरमणीयास्तदेकदेशाभेद्यद्दृश्यंते॥राजा॥स्वगतं॥उपपन्नमेवैतत॥
सकुतुकमभितोविलोकयन्॥अत्रकिल॥नादब्रह्मविनोदिनीविजयतेगां

94

९५

धर्वविद्येतियायाविद्याविजयश्रियोजननमः चापेषुसंबंधिनी॥जीवा
नंदनिद्रानपारदगुणप्रख्यापयित्रीचयाविद्याशेषतयाविभातिसकलं
भक्तिप्रभावान्मम॥चित्तशर्मा॥किंबहुनावैषयिकसुखपरिपोषणैकनि
रतोवास्थापनतत्रसिध्धांतोपितदीयपरिणतिवैरस्यापनमदत्तिनुगुणा
हितनिर्वेदातिशयफलितपरमार्थसुखस्वरूपजिज्ञासामुखेनविद्याशे
षतयैवाध्यवसीयते॥राजा॥पुरोविलोक्य॥गाढोद्धषजरासनीडनिवि (९८)

उद्यानध्वनीझोद्दरक्रीडन्नीडजकाकलीकल कलाटोपैर विक्षेपिणः॥ देवे
क्षापिनि विष्टतुष्टमनसः शिष्टाइमेतापसाःसंघीभयसमापतंतिकरमे
धर्मोविश्रुश्राइव॥ अये विमृश्य तामिमेकरइति॥ संकल्पः॥ देवसन्निहि
तामिहभवंतमवकर्ण्यपुण्याभिराशीर्भिर्योजयितुकामावेदारण्यवा
सिनस्तापसाःसंप्राप्ताः॥ चित्तशर्मा॥ किंचिद्दिवराज्ञानमनुसृत्य॥ जनां
तिकं॥ वयस्यमुख्याधिकारतयासाधनचतुष्टयत्वेनाभिमताविवेका

(96)

दयोमोहादिभिरनभिभूततया भवदुपानयनाय भगवत्या तापसवेषेण प्रहिताः ॥ राजा ॥ सपरितोषं ॥ वयस्य तर्हि वयमभ्युपगच्छाम इत्युपगच्छति ॥ ततः प्रविशंति विवेकादयस्तापसाः ॥ २ ॥ आदिष्टा वयमत्र भवत्या शिवभक्त्या जीवराजमधिगम्य विद्यापरिणये धिकारनिर्वहणाय ॥ तददृष्टपूर्वोयमस्माभिरिह कथं विधेयीकरणीयः अथवा तदीयनर्मसचिवश्चित्तशर्मा परिचितपूर्वः स एव सर्वमपि 98

नःसंविदधीत ॥ राजा ॥ स विनया द्दरमुपसत्यसप्रश्रयांजलिर्ब्रित्तश
र्मणा सहानमति ॥ तापसाः ॥ राजन्महत्तरेणाश्रेयसायुज्यस्व ॥ चिंत ॥ पु
रतो निर्दिश्य ॥ विद्युत्तांडवडंबरंजगद्दिदंमत्स्योर्मुखांतर्गतं सत्य ज्ञानसुखै
करूपममलं ब्रह्मैव तच्छाश्वतं ॥ तस्याप्तावयमभ्युपायइतिचप्रज्ञान
संशीलनादंतस्तोष विकासिवक्त्रकमलः सोयं विवेकः सुधीः ॥ अस्यना
मनिस्मृतेपिमोहानप्रभवत्येव ॥ परतो निर्दिश्य ॥ अयं विरागः परिभु

97

क्षमूर्तिरलक्षितब्रह्मपुरंहराद्रिः ॥ तदस्यदृष्ट्यानकुतोपिकिंचित् कया
ल्कणीयान् कनकाचलोपि ॥ किंच ॥ मज्जत्वपर्वमेलनेनजगतीकांता
रशैलोल्करैस्त्रुट्यत्मभ्यतुचांतरिक्षमभितोनक्षत्रचंद्रग्रहैः ॥ कल्पां
तज्वलनः प्रसत्यसकलंसाटोपमाल्लेदुवातत्वामर्शविनोदिनोस्यतुदृ 96
शालोमापिनोमीयते ॥ तदेतस्यसन्निधानेकामः परासुरेव ॥ इतरते
निर्हिंभ्य ॥ ताविमावप्राकृतसुखप्रापणारूतप्रातिभव्योम्नपरिमित

सुकृतपरिपाकप्रभवौ शमदमौ ॥ अपथविधा विनोविषयकूपनिपा
तकृतो बहिरबहिश्चरेंद्रियकरालतुरंगगणान् ॥ इदमवयस्यसद्गु
णशातेन पदं परं गमयितुमीश्वरः शमदमप्रतिमोनपरः ॥ राजा ॥ स्व
एतेन बहिरिंद्रियनिग्रहः शमोयमंतरिंद्रियनिग्रहोदमोयमित्यभि
हितं भवति ॥ चित्त ॥ वयस्यलदंतैरविश्लिष्टतयैवगम्यतामिष्टलाभा
य ॥ त्वय्यमीभिर्वर्तेहष्टेसंयमींद्रैर्वेनाहूनं ॥ नीयमानः स्वकार्यायस्म

र्यतेरघुनंदनः॥अवि॥विषयवासनेकःएतेराजानममितःपरिवार्यग
छंति॥विष॥परिसरवर्तिनोयोगाभ्यासमार्थमुपगताःवेपितापसाःस्युः
राजा॥पुरतोनिर्दिश्यकिमिदमकांडएवविद्युत्पुंजपिंजरितमिवस ९८
प्रकाशेनमोहयते॥संकल्पः॥देवमभवदभ्युदयायसकलमंत्रतंत्र
पटलीर्नानाविधन्नतुवितनीरूपासनाभ्यसन्निधाप्यतामसीराजसी
चशिवमक्तिरितोमुखतयाभवदुपगमंप्रतीक्षते॥राजा॥ससंभ्रमा

दृरमभिगमनं नाटयति ॥ ततः प्रविशतः शिवभक्ती ॥२॥ यथाकथञ्चिद्दृ
वाभ्यामेहिकामुष्मिकाभ्युदयविशेषेषु निकाममवरुध्य जीवराजो
यमविद्याविधेयीकरणीयः ॥ राजा ॥ सप्रश्रयमुपसृत्य प्रणमति ॥ भ
98 क्ती ॥ वत्स सकलकल्याणभाजनं भूयाः ॥ राजा ॥ भगवत्यौ ॥ मदुद्देशादि
होपगमनस्य प्रयोजनमवगंतुमिच्छामि ॥ भक्ती ॥ वत्स भवदभिनं ९८
दनमंतरेण न किंचिदिह नौ साधनीयमस्ति ॥ राजा ॥ सदृशमेव खलु त

द्भवादृशीनां महानुभावानां॥ पुरतो निर्दिश्य भगवत्यौ किमेतदिति ब
हलकंदलनशितशिखज्वालजालजटाला निकाम्यपि महोमंडलानि
दृश्यंते॥ तामसी॥ भुवनहिताय बभ्रु पशुपतिविस्वादृयः स्व
यंयानि॥ एतानि सन्निदृधते पाशुपतादीनि तानि तस्त्राणि॥ राजसी
वत्स सप्रश्रयेणोपसदृनेन परिगृह्यतामिमानि दिव्यास्त्राणि॥ एता
निसमन्तप्रसुपस्थितानि समयेषु भवतः श्रेयो महद्विधास्यंति॥ राजा ३६

तथेतिचरणाग्रहणंनाटयति॥अनसूया॥भट्टिनिराजानःखल्वपर्वशा
स्तास्त्वप्रियाभवंतीतिपाशुपताद्दिव्यास्त्रप्रतिपादनेनशिवभक्ति
भ्यामात्मनिघ्नीकृतोदेवः॥राजा॥सपरितोषं॥भगवत्सोपरमनुगृही
तोस्मि॥निश्शंकमभिमतेषुविधेयेषुअनुयुज्यतामयंजनः॥तामसी
राजन्नितःपरिसरएव॥परतोनिर्दिश्य॥मंत्रोयंशरभेश्वरोविजय
तेसर्वार्थचिंतामणिर्विख्यातोबगलामुखीमनुरसावल्पश्रमैःसिध्यति

यस्मात्तुयग्रहमीहसे तदमुनाधन्यः स सर्वो भवेत्संस्थेवं मन्तुकोटयोत्र
निरतः श्रेयोखिलं प्राप्नुहि ॥ अथवा ॥ ध्येनेनाभिचरत्यजस्वसयथाध्ये
नोनिपत्यक्षणाद्दत्तेमुविकुकुटाद्दिएथुकानेवं द्विषोदुर्जयान् ॥ आ
दत्तेस किलाध्वरोतिरभसादग्रेतवाकं टकं साम्राज्यं भवितासुखोत्तर १००
मितः किन्नाम भाग्यं परं ॥ राजसी ॥ सास्यं ॥ जनांतिकं ॥ किमेभिरिंद्र
जालेरिवातिफल्गुस्वभावैरतिचिरंक्लेशासाध्यैरीषदपचारेपिचित्तवि

न्मम कारिभिः॥ इत आगम्यतामिति राज्ञानमन्यतो वकर्षति॥ राजा॥ स्व
अहो प्रकृतिगुणदोषादनयोरप्यसूया॥ राजसी॥ वत्सद्दश्यतामयेपि
पाशुपतं गाणपतं सौरं शाक्तं च पांचरात्रमिति॥ पंचमतानि जयं
ति स्कांदे ह्येतानि स्कांदषष्ठानि॥ तदेतेषु श्रेयः पशुपतिमतं तत्र नियं
तो यदि त्वं दीक्षेथास्तदुपरि दुरापन्न किमपि॥ स इत्थं सारूप्यं शांतम
खमुखामर्त्यमकुटीमणिरत्नोमज्योतिर्धगधगन किंजल्कितपदं॥ अ १००

101

थवा॥ मेरुमंदरादयः इव वाजपेयराजसूयपौंडरीकादयो महाक्रत

वः तः सहस्रशो दृश्यंते॥ न दृतेषु येषु केषुचिदभिलषितमभिसं

धाय पशुपतिराराधनीयः॥ प्रसीदत्येतेन प्रतिभवति देवस्तवप

ले पशुक्षेत्रापत्यादि च मुख्य फलत्वेन भवति॥ त्रिलोकी सांम्राज्यं त्रि

चतुरदिनैः संभवति चेदमुष्यानुष्ठाने बत कथमभिज्ञो न रमतां॥ य

दि तावदमीषु बहु वित्तव्ययायाससाध्यतयो मनसो न प्रवृत्तिः॥ तर्हि 109

त्तिष्ठतुपरतोदृश्यतां॥इमाःकिलशांखपद्मादिनिधिदेवताइवपंचा
ग्निविद्येतिवैश्वानरविद्येतिपर्यंकविद्येतिचवहुधामहोपासनाःस
हस्रमितादृश्यंते॥एतासुयाकाचनकल्पवल्लीभावालवालेभवतोनि
101 धेया॥नभारलेशोनचदूरयानंफलंत्वभीष्टानिभवन्मतानि॥चित्त॥
भगवत्तिकानामसामहोपासना॥यत्रकिलसंकल्पतएवसर्वकामा १०१
र्थसिद्धिश्श्रूयते॥राजसी॥साकिलसर्वोत्तमेतितदंतिकमुपनीय

१०२

राज्ञानमियमस्माविति इहहर विद्यां दर्शयति ॥ राज्ञा ॥ सहर्षमात्मगतं ॥ दिष्ट्याहमद्यवेहारण्यपरभागसविधमुपगतोस्मि ॥ प्रका ॥ सा
वहितं ॥ भगवति निरुपधिवत्सलयाभवत्या निकाममनुगृहीतो १०२
हं ॥ एतेषु येषु केषुचित्कर्मसु यासु कासु चिदुपासनासु च विरचिताभि
निवेशो यथामति यथोपपत्ति च शिवमाराधयामि ॥ इति विधिष्व
भिनिवेशं दर्शयति ॥ प्रवृत्तिः ॥ स खिवविषयवासने दिष्ट्या फलितइव

व्यामनोरथः॥यदेषकामन्त्रियोपासनास्वभिनिविष्टश्चिरेणामदनु
रोधीहश्यते॥विष॥विमर्शनीयमधुनापिममसंदेहएव॥अवि
द्या॥ममतुनसंदेहः॥यथापुरमस्मासुविमुखएव॥कुतोपिदाक्षि
ण्यादाभिमुख्यमभिनयति॥परथायमस्मासुकथमेतावदुदासीन॥
धिक्कष्टदग्धमेतन्ममजीवितं॥गतेनेतादृक्प्रेमण्ययमहमितिद्वैतर
हितेचरत्ययमेकस्मिन्नपिजनइवप्रेयसिनिजे॥ज्ञानैर्मानिन्म्लानेगत

१०३

गरिमणिप्राणधरणात्परो नैव स्त्रीणां हृदयदहनः क्रूरदहनः॥ राजा॥

सविषादं॥ सखे चित्तशर्मन्नतिचिरेणास्मज्जनर्तितप्रतिमोपममन

पेक्षितव्यापारैरात्मानमायासयामि॥ चित्त॥ स्व॥ अयमस्याविद्याभि

रतिरसाभिनिवेशपरिणामः॥ प्रका॥ वयस्य कुत एवं॥ राजा॥ सखे

श्रूयतां॥ किमेभिर्व्यापारैर्ध्रुवमिह फलं किञ्चितिमनाग्विमर्शप्रस्तावे

मम हि विफलं भाति सकलं॥ किं बहुना॥ कियत्कालानेवं लुठनमिति भ

१०३

त्स्यानिगदितोनियोगोपिव्यर्थश्रमइवहिनिर्वेदयतिमां॥ चित्त॥ हंतभ
गवत्याःप्रसादात्सांप्रतमुदपद्यतनिवृत्तिहेतुर्विषयविदूषजनितोवय
स्यस्यनिर्वेदः॥ततःप्रविशतिनिवृत्तिरष्टांगयोगश्च॥ निवृत्तिः॥ ततस्त
तः॥ योगः॥ तदनुभगवत्याशिवभक्त्यातदेवमभिहितं॥ अद्यखलुजी
वराजमतिचिरेणविविधकर्मोपासनासुपरिक्लिष्टं चित्तशर्मणासह
वेदारण्यपरभागमानेष्यतिनिवृत्तिः॥ तदत्रविरुध्यापरिशुध्यवर्त्तिनि १०३

104

रोधायतत्प्रतिहारभूमिमधिगम्यतां॥ अन्यच्च तस्यजीवराजस्यस्वप्ने

सांबदृष्टिणामूर्तिरचिराद्दध्यक्षणीयइति॥ निव॥ अहमपिप्रत्यक्ष 902

नैष्ठुर्यकलहादिकमंतरेणतापसानांस्वाश्रमपदद्दर्शनप्रार्थनापदेशे

नजीवराजः प्रवेशनीयइतितयैवप्रहितास्मि॥ उभौराजानमुपगच्छ

तः॥ निवृत्तिः॥ राजानंप्रति॥ वत्सनिरंतरायमितोभवद्दानयनायभ

गवत्यायमणांगयोगोपिप्रहितः॥ योगः॥ विजयतांदेवः॥ राजा॥ किम

यमेवसमहात्मायोगः॥ प्रणमति॥ निवृत्तिः॥ योगंनिर्दिश्य॥ निरुध्य
प्राणादीन्त्रियमितपरिस्पंदवशितानतोबध्वागाढंकरणपटलद्वारनि
करं॥ ज्ञातछिद्रात्तुंभाद्रुदकमिव विषयव्यपरिगाळन्मनोरुध्वात्मानंगमयि
तुमस्मावेवनिपुणः॥ अवि॥ अयिविषयवासनेननुप्रागेवमयाभि
हितंप्रतीपएवायमिति॥ संप्रतिपरतोजिगामिषुरिवनिवत्यासहकि
मपिमंत्रयते॥ किमत्रकरणीयं॥ विष॥ समयेसाहसमवलंब्यपश्या

१०५

मः॥ निद्र॥ विवेकादीनांकर्णएवमितिकथयति॥ तापसाः॥ सशिरः

कंपं॥ महाराजतदितःपद्यांतरएवास्माकमाश्रमपदं॥ तदवलोकने

नवयमनुगृहीतव्या इति॥ राजानंहस्तेगृहीत्वापरभागंप्रवेशयंति।

विषय॥ चित्तशर्माणमवलंब्यसहैवप्रविविक्षति॥ योगाः॥ हंडमुग्ध १०६

म्यधित्काापिशाच्चीतिगाढहस्तिकयानिवर्तयति॥ चित्त॥ हंतकियद

त्रसंविहितंभगवत्या॥ तथाहि॥ निवृत्तेरग्रेकाप्रभवतुतयामीचघटि

नाविवेकाद्याभस्तस्यानदुपरिसयोगोपिघरितः॥प्रमाद्दाशंकानप्रसज्जतिक
णीयस्यपियथातथासन्नह्यंतःपरिणतिषुमुह्यंतिनबुधाः॥वयस्यदिष्ट्या
योगाप्रभावेनव्याधिस्त्यानसंशयप्रमाद्दालस्याविरतिभ्रांतिदर्शनालब्ध
भूमित्वानवस्थितत्वादिभिर्विक्षेपैर्दुःखदौर्मनस्यादिभिस्तत्सहजैर्भिर्व
त्तिभिश्चोत्सृष्टतयासुनिर्मलमात्मानंपश्यामि॥दिष्ट्यायमस्याक्रमेतद 105
नुग्रहलाभः॥अस्यतावन्महात्मनोऽवयवभूतायमनियमासनप्राणा

यामप्रत्याहारधारणाध्यानसमाधयइतिअष्टाविमेमहाभागाः॥ अत्राहिं
सासत्यमस्तेयंब्रह्मचर्यपरिग्रहइतिपंचैतेयमानाम॥ शौचसंतोषतप
स्वाध्यायेश्वरप्रणिधानानीत्येतेतुपंचनियमाः॥ तदेतेषामेकैकस्यप्रभा
वोगिरामभूमिः॥ दिङ्मात्रमुदाह्रियतेश्रूयतां॥ यत्रायमहिंसानामयमः
प्रतिवसति॥ तत्रतनुभृतामन्योन्यवैरगंधोपिनप्रसरति॥ दृश्यतामत
त्रेदमाश्चर्यं॥ गोवत्सान्पिबतोनिजस्तनमियंव्यालेढिशार्दूलिकाबर्हि
बर्हसमीरणैःसुखयतेवाताशिनःपोतकान्॥ गह्णंतोज्ञरदग्धतापसगणं

णाणा विमेवानराज्ञोयाधारगतागतेषुसुखपर्यस्यबाजमैत्रीभ.तः॥ रा
जा॥ स्व॥ अतःकिलभगवान्पतंजलिरसन्नयत॥ अहिंसायांवैरस्यागा
इत्यादि॥ चित्त॥ अथसत्याभिधायंद्वितीयोयमोयमनुग. ह्णति॥ ते
नयद्यथाभिधीयतेतत्तथैवभवति॥ अतएवकिल॥ सर्वेषांचम
नुष्याणामर्थेवागनुवर्तते॥ यमिनांचकृतार्थानांवाचमर्थोनुवर्तते॥
राजा॥ ततःकिलतेशापानुग्रहयोःप्रभवंति॥ चित्त॥ तदेवमप्रमेयापरि

108

107

मितप्रभावोयंयोगः॥योगंप्रति॥आर्यभवदनुग्रहेणानिरंतरायमभिमत
सिद्धिमभिलषतिमहाराजः॥योगः॥सखेचित्तशर्मन्नपरिमितशक्तेःशिव
भक्तेरनुग्रहभाजनस्यकिमस्यपरिहीयते॥तदेतैःशमदमादिभिःस्व १०८
समारब्धकार्यनिर्वाहजागरूकामत्रभवतींशिवभक्तिंप्रतिपद्यतयानिर्व
र्त्यमानामिष्टसिद्धिमधिगच्छतुमहाराजः॥चित्त॥यदाज्ञापयत्यार्यइति
सर्वैस्सहभक्तिंप्रतिगमनंनाटयति॥अविद्या॥पुरोविलोक्य॥सातंकं॥

अयिविषयवासनेकिमेतद्वापतितं॥यदयमवधयनःपरागतएववे
दारण्यपरभागं॥देवः॥किमितःकरोमिमंदभाग्या॥विषयवासनास
धैर्यावष्टंभं॥देविमाभैषीः॥नन्विमेजगज्जयिनःकामादयःसांप्रतमसु
107 निर्व्यपेक्षमेवपराक्रमायसन्नह्यंति॥तदेतैःसममहमेवतानवस्कंद्यप
रावर्तयामीतिसाटोपंकामादिभिस्सहनिष्क्रामति॥नेपथ्ये॥कलकलः॥
श्रुत्वा॥विवेकादयःसामर्षं॥देवकामादयोस्मदीयेषुकिमप्योजायंतइव १०७

तत्किमिति विमृश्य परावर्तेमहीति निष्क्रामंति॥ राजा पुरो विलोक्य॥ हंत
समरसन्नाह समुद्बोधितसंस्कारेणामयास्मृतमात्राण्येवतानि दिव्यास्त्रा
णि सन्निदधते॥ सप्रश्रयं प्रणम्य॥ भवत्सन्निधानमहिम्ना विवेकादि १०८
तत्तत्प्रतिभटैरेव तत्तदरि निबर्हणानि क्रियंते॥ तदनुगृह्यतामयं जनः
निवृत्तिः॥ यावदहमप्येतेषामायोधनवृत्तांतमप्युपलभ्य सर्वमिद
मावेदयितुं भगवतः सकाशं गच्छामीति तैः सह निष्क्रामति॥ राजा॥ पु

रो विलोक्य ॥ प्रासादे पुरतास्य ये मगदृशाः शादीतिसंमोहयन् विषकूशास्वि
शिखासुलोध्रकुलुकारिं हिंदिरां धावयन् ॥ उन्मीलन्नुडुराजए ष किरणैरे-
भिः सुधासांद्रितैर्मामानंदयते महीध्रशिखरे कैलासमध्यस्थयन् ॥ योगः
स्व ॥ अचिरादेव तदपि संपत्स्यते ॥ प्रका ॥ राजन्न विरतपरितमसकलजी
वमंडलविश्रमसुखविधायिनी परिणामति भगवतीयं रजनी ॥ तदिहनै
दीयसिद्धामादीनामाश्रमपदे संविश्यतामति वाहयामः ॥ राजा ॥ तथेति नि

108

ष्क्रांतास्सर्वे॥ ॥षष्ठोंकः॥ ॥ततः प्रविशति निवृत्तिर्विवेकश्च॥ ततस्ततः॥ निवृत्तिः॥ तदनु कामादिभिस्स्मृतमात्र एव॥ गर्वोन्माद प्रहर्ष इति केतिकतिवा कामहृताःसमेतानेर्घ्याक्षांतितैः प्याद्य इति कतिधा निस्मृताः क्रोधयोधाः॥ कार्पण्यात्स्पृदैन्याद्यय इति कति ज्ञा निर्गता लोभवर्ग्याः किंचैते मोहहृताः कतिबत मिलितास्तं भतर्क भ्रमाद्याः॥ हंत विवेकादिभिरपि तत्प्रतिभटतया निजनिज परिवाराः

१०६

109

सन्निधापिता एव॥ अत एव॥ दिशि विदिशि प्रसर्पति बले परितस्तु मुले
बहुलदुरंतसंतमससंततिहंतुरिते॥ बलपद्धरेणुभिर्घनघनाघनमेदु
रितैर्वृतहरिदंतरं सकलमेव निरंतरं॥ अपि च॥ पूर्वपश्चिमसमुद्रयो
रिव सरभसमरसाहसविनिद्रयोर्मोहविवेकसैन्ययोरन्योन्यसंकल
नतः प्रस्तुत एवाभिमर्दः॥ तथा हि॥ शास्त्रास्त्रपौरुषे मोहसैन्यसमितिसमा
गते॥ चिन्मुद्रयाप्यपद्यंत जेतुकामाः शमादयः॥ विविदिषा॥ अत्ता॥

सहर्षं॥ स्व॥ जयस्तर्कस्य पक्षमवलंबते वाग्देव्यां॥ प्रकाशं॥ ततस्त
तः॥ निव॥ तदनु॥ पश्यत्यग्रे विवेकं तरणिमिव तमःस्तोमापिदुद्राव मोहः
कामः श्यामो विरागाद्द्रुतमभजत्तवाकांदिशंकांदिशीकः॥ क्रोधः प्रध्वस्त ११०
योधः शमसविधगतः सद्य एव प्रलिल्ये शेषास्तल्लाविशेषाः कथमरिए
तनोपद्रुता विद्रुतावा॥ दि॥ विदिषा॥ सपरितोषं॥ तदनंतरमविद्याविक्
माचारा॥ निवृत्तिः॥ सा तावदस्याभिहितनिजबलपरिभवजनितदुः

खसंवेगमोहितातयैवसाभ्यासमित्थमभिहिता॥अहंनितदेवंविधेम
हतिसंकटेभवतीमंतरेणकाप्रगल्भेत॥तदिहभवत्यैवमाप्रियतां॥
भवदुपगममात्रेणयथापुरमेवसकलंपरावर्ततेति॥तदनु॥साद्दी
र्घंनिश्वस्य॥क्रोधागारमनुप्रविश्यदयितंव्याधस्यपाशानलंसंमत्या
पिचतत्रतिष्ठतत्तपःकांतारयात्रामपि॥भूयस्तस्यकथंव्रजामिपुर
तःसिध्दिस्तथात्वेपिकाकिंकुर्यामिहचित्तशर्मवचसाविस्रंभतोवंचि

ता॥ रतिसविषादं॥ परावृत्यगंतुमैछत्॥ अथप्रवृत्तिस्तामेवमभिहि १११
तवतीभद्दिनिमनुसंवेगाजनितदुरध्यवसायैः पुरुषमेनमपहाय क्क
गमिष्यसि॥ यत्रक्कापितमंतरेणास्वयमेव किंप्रभविष्यामीतिमन्यसे
किंच॥ परभागगता इति किमस्माकमेते विप्रकृष्टाः॥ पद्दांतर एव तिष्ठं
ति॥ अतस्तदप्रहाणो नैवतद्दाचरितानि निरूपयिष्याम इति यथापुर
व्यवहिता एव तिष्ठंतीति॥ त्वं पुनरिह क्क समागता॥ विविदिषा॥ अ

हं किल संदिष्टास्मि भगवता योगेन ॥ वत्से विविदिषेतत्र भवती शिवभ
क्तिमुपेत्य मन्मुखेन ब्रूहि ॥ भवन्नियोगमनुरुंधता मया काममपि निद्रा
मुपकल्प्य तत्र साक्षात्कारितसांबदक्षिणामूर्तिर्जीवराजः प्रमोदातिश
यतरक्षितो भवत्पादकमलमवलंबयितुमतिमात्रमुत्कंठते ॥ तदयं
यविकंबितमेव भवदनुग्रहभाजनीकरणीय इति ॥ निव ॥ श्रुत्वा ॥ सप

रितोषं ॥ यावदिममर्थं भगवत्याः कर्णगोचरीकरत्या तामत्र सपदि सन्निधा

पयाव इतिनिष्क्रांते॥ ॥प्रवेशकः॥ ॥ततःप्रविशतिचित्तशर्मणा

विवेकादिभिर्योगेनचसहयथानिर्दिष्टोजीवराजः॥२॥मंदस्मितस्न

पितमंजुमुखारविंदंवामांकसंगिवनितामुखलोलनेत्रं॥चिन्मुद्रि

काविधुतचित्तमलांधकारंज्योतिर्मनोबलनजानुजहातितन्मे॥अपि

च॥सादृष्टिःसहृयासचस्मितसुधाहृद्यःप्रसादोमुखेतच्चोदारगभीर

धीरमधुरंवीरासनाध्यासनं॥चिन्मुद्रापिचसाचिरंतननतमःसंदोहवि

ध्वंसिना सर्वं हंत पुरः पुरो दिशि दिशि प्रत्यक्ष मालक्ष्यते ॥ पुरो विलोक्य
हंत विभातप्राया रजनी ॥ यदि हानी ॥ आयां त्या दिवसश्रियेह भगव
ज्ज्ञमेव विध्वंसिते । विषज्ञोह तमः प्ररोह निकरे पुष्पत्प्रसादोत्तरं ॥
आविर्भावयितुं जगत्प्रसवितुर्ज्योतिर्वरेण्यं पुरश्चित्ते भुद्भिरिवाविर्
रस्ति कृतिनः प्राच्यां दिशि भवेति मा ॥ परतो वलोक्य ॥ अहो खलु सार्व
त्रिकता विषयानुबंधस्य ॥ मामन्विष्य समागमिष्यति वपुः स्पर्शं प्रसाथ

प्रेमतः सल्लापैरपि तोषयिष्यति ततो भुक्त्वा वशोषं विसं ॥ मद्धक्का दुर
रीकरिष्यतीव धरिष्यं मुद्राचिंतयन् प्रागागत्य विहारपुष्करसरः को
कोपमास्ते धुना ॥ सखे भवदीयसंविधानसुदृढप्रवहणेन निस्तीर्णाइ ११३
वाप्यम विद्यासंकटविषसागरः ॥ चित्त ॥ वयस्यननु निस्तीर्य विभ्रम
सुखमप्यनुभूयते किमुच्यते निस्तीर्णाइवेति ॥ राजा ॥ सखे चित्तशर्म
न्नपि नाम निष्क्रम्य हमेवनामत्र भवतीं विद्यामुपलभेयं ॥ नेपथ्ये ॥ इय

महमागतास्मि॥राजा॥श्रुत्वासहर्षं॥सखे॥प्रसन्नमधुरगंभीरवृत्तिरिय
महमागतास्मीत्युपश्रुतावाचोयुक्तिःकर्णविवरमाप्याययति॥पुनर्नेप
थ्ये॥वत्सेनिवृत्तेकियच्चिरंविलंबसे॥सत्वरमुपगम्यतां॥अपिसत्य
मागतोत्रचित्तशर्मणासहराजा॥निवृत्तिः॥नन्वत्रसन्निहितएवायं॥
यावदेनमुपसरामः॥ततःप्रविशतिनिवृत्त्यासहशिवभक्तिः॥१॥वत्से
निवृत्तेअपीदानींसफलस्तेपरिश्रमः॥अपिदिष्ट्यायमविद्याद्यैर्महा

न्मोऽच्चितो जीवराजः॥ अपिहतसंकल्पास्ते मोहादयः॥ अपि सफलमोज्जा
यितं शमादीनां॥ अपि निर्व्यूढप्रतिज्ञश्चित्तशर्मा॥ यद्दयमिममुद्देश
मनुप्रापितश्चित्तशर्मणा महाराजः॥ निवृत्तिः॥ अंब भवद्दत्तु यहः किमि
व हि श्रेयो न समयग्यिष्यति॥ राजा॥ सत्वरमुपसृत्य॥ भवविषसागर
तरपोतरणोतरणोतरणो विमोहस्य॥ भगवति भावुकमर्तेशतकृत्वस्तेन
मोऽस्तु शिवभक्ते॥ इति चित्तशर्मणा सहसाष्टांगं प्रणमति॥ शिवभक्तिः॥ व

स्मावविलंबितमेवाभिमतेनयुज्येथां॥चित्तशर्मा॥भगवतिभवदीयनि
र्द्देशेनकथंकथमप्यमुंदेशमानीतोमहाराजः॥अनंतरकरणीयेतत्र भ
वतीप्रमाणं॥परंतुविद्याविरहकातरःक्षणमपिविलंबंनसहतेदेवः
शिवभक्तिः॥वत्सेविरक्तेमद्वचनादुपनिषद्देवीमुपेत्यब्रूहि॥अत्रकि
लकुलमहत्तरासुत्वमेकिकापरावरज्ञासर्वस्यजनस्यविधेयार्थसंदर्शि
नीदृष्टिरिवसर्वकार्येषुप्रभवसि॥भवदसन्निधानेनसर्वैरितिकर्तव्य ११४

115

नामग्रहैः स्थीयते ॥ तदविलंबितमेव विगाहने पथ्यविधिना प्रसाधि
तामत्र भवतीं विद्यामानीय पुंडरीक भवने सन्निधापयेति ॥ विरक्तिः
यदाज्ञापयति भगवतीति निष्क्रामति ॥ शिवभक्तिः ॥ वत्स किमतीव 114
संभ्रांत इव दृश्यसे ॥ राजा ॥ भगवति तत्किं ब्रवीमि ॥ हर्षातिशयग
द्गदया वाचा निगदितुं न पारयामि ॥ भवन्नियोगेन किंचिदिव विश्रां
तिसुखमनुभवन्नवशोपपन्नया विरचितसकलबाह्यकरणमुद्रया

परिगहीतोस्मि ।। तत्र किल दिव्यमंगलसूचकं कमपि स्वप्नमालोकयं ।।
शिवभक्तिः ।। वत्स ।। कथमिव ।। राजा ।। वर्षानिशीथे गहनांधकारे वनांत
मप्युद्घटदुष्टसत्वं ।। कुतोपि हेतोरवशात्प्रपन्नो दीनां दशां कामपि निर्वि
शामि ।। तथा सति ।। विघटितसकलक्लेशं विपरीतविभाविताखिला
वस्थं ।। आनंदकंदलनमिव किमपि महोमंडलं ममाविरभूत् ।। तद
नु दुःस्वप्नतः प्रबुद्धोहमिति निकाममभिनंदतासावधानप्रणिहितदृष्टि

116

नामयातस्मिन्महोमंडलेनिभृतंनिरूप्यमाणे॥श्यामामुत्पलशोभिनी

मृगसुतामंकेदधानंमुद्रापुस्तंचामृतकुंभमक्षसरमप्याबिभ्रतंपा

णिभिः॥अर्द्धाक्षंभसितावदातवपुषंरुद्राक्षमालापुषंचिन्मुद्राविं ११८

शदीकृतात्मविभवंस्मेराननेंदुंशिवं॥तद्दनु॥जयजगदेकनाथजय

सर्वसुराधिपतेजयनिगमांततत्वजयसत्यसुखांबुनिधेजयनिरु

पाधिवत्सलजयाश्रितकल्पतरोजयजगदार्तिभंजनजयेशदयाजल

धे॥जय करुणानुषंगवदपांगतरंगकणाधिगतलतथाप्रभावबलजि
न्मुखदेवतते॥जयजलजासनादिविबुधव्रजमौक्तिमणिप्रकरमयू
खकर्बुरितपादसरोजरुचे॥दुर्वारोपनमद्भवार्तिदवधुप्रध्वंसिमंद
स्मितज्योत्स्नाचारुमुखारविंदपरमानंदैकसांद्राकृते॥सानंदाश्रुस
नंदनादिशमवत्संघातचूडातटीहस्तांभोरुहकोरकीकृतशरत्पवैंदुबिं
बायित॥संसारार्णवकर्णधारसकलक्लेशांधकारछटाचंडांशोसकल

ष्पितार्थघटनासंतानचिंतामणे ॥सत्यज्ञाननिधे सकल्याणमते सायु
ज्य लक्ष्मीप्रद स्वामिन् दैवतसार्वभौम दयया मां पाहि सांब प्रभो ॥ इति ११८
नितांतमानंदपरवशो भगवंतमहमस्ताविषं ॥ तदनंतरं च शिरसा नि
पीड्य चरणांबुजे गुरोरसकल्याणम्यमयि किंचिद्दुषिते ॥ उपह्वय मामु
पगतस्य दक्षिणश्रवणे किमप्यकथयद्दयानिधिः ॥ शिवभक्तिः ॥ अत्य
सपरितोषं ॥ स्व ॥ हंत अतिवत्सलेन भगवता महोपनिषदुपदेशेन य

रमनुगृहीतोसि॥ इतःकरगतकल्पेवभवतो विद्या॥ ततःप्रविशतिनिजप
रिवारेणसममुपनिषद्देवी॥२॥ अजरमनादिमध्यमविनाशिचिदेकर
संकिमपिमहोजगज्जनकमस्तितदेवसुखं॥ मरुषुमरीचिकाजलमिं
वासदिहंसकलंतदवगमेनमस्तुमतितीर्यसुखीभवत॥ विविदिषा॥
अंबकथमेतत्॥स्मृतिः॥अभीशोरज्ञानादहिरहयतित्रासयतिच प्र
तीतेतत्तत्वेनकिमपियथासंप्रतितथा॥स्वरूपस्याज्ञानाच्चरमचरमि

118

सेवमुद्दम्‌दिष्टंतस्यज्ञानेसतिफलतिमिथ्यैवसकलं॥अत्रकानामक
थंता॥विविदिषा॥पुराणादीनांमुखंपश्यति॥पुराणादयः॥वत्सेएव
मेवैतत्‌॥आनीतंनपरेणाकेनचिदिहंस्वात्मान विस्मारितंस्वस्मिन्ने
वनिषण्णतुच्छविषयक्लेशान्‌विधत्तेबहून्‌॥सत्यंज्ञानमनंतमस्मि
तदहंब्रह्मेतिजानातिचेत्तस्यैदंतपनोदयेतमरवस्फीतंजगल्लीयते॥
अक्षा॥उपपन्नमेवैतत्‌॥विविदिषा॥वत्सेवंकिमत्रमूलमितिविवि

११८

द्रिषामि॥पुराणादयः॥वत्सेभ्रयतां॥मायानामविचित्रचरीतिरसतीका
चिन्महोल्लासिनीसत्यं वस्तुनिगूहतिप्रकटयत्यसत्यं तमिथ्यायितं॥दृ
118 ष्टान्तेप्रथितेचिरेणासहजे तस्यास्तथातद्वशा द्वात्मासन्नपिनेश्यतेजग
द्सत्सदृतमालोक्यते॥राज्ञा॥सरभसमुत्थायचित्तशर्मणासहसा
ष्टांगंप्रणमति॥उपनिषद्देवी॥वत्सावचिरेणलिप्सितलाभहर्षितौभ ११८
यास्तां॥शामादयः॥सर्वेपिससंभ्रममुत्थाययथोचितमुपचर्यपथाय

119

थमुपविशांति ॥ शिव ॥ भगवतिमहानुभावाद्यसि ॥ कपिलकणादः
जैमिनिपतंजलिसत्यवतीतनुभवगौतमाभिमतमार्गविभिन्नतया
सुरतटिनीसमुद्रमिवदीव्यद्दनेकमुखीगमयसिवस्तुतत्वमखिला ११६
नपिभिन्नरुचीन् ॥ तदत्रभवत्या कियच्चिरमुद्भास्यते ॥ उपनिषद्देवी ॥ भग
वतिमत्तोनकिंचिरंतरमास्ते ॥ प्रागेवसांबशिवानुग्रहेणसिधुरूपाश्च व
णादयःसँक्षमुक्तोसाधितयाविद्यया सह पुंडरीकभवनोपकंठेनिर्विकल्प

स्यस

कसमाधिनामनिमहेशितुरारामे युष्मदुपगमंमहेश्वरसान्निध्यंच प्रती
क्षमाणास्तिष्ठंति ॥ नेपथ्ये ॥ वध्वंतामुरतोरणानि सरसैराशाश्वगीताम्र
॥१ तेः पर्यंतामपितन्यतांपुरमिदंसंस्कारभुधांतरं ॥ आरूढोवृषराजमद्रि
सुतयाद्देवोयमागादितोज्जीवस्यानितरत्वतोममतयाविद्याविवाहोत्स
कः ॥ शिव ॥ सन्निहितएवपरमेश्वरः ॥ यदिहानीं ॥ श्वेतंतेहरितोद्दशा
पिपरितश्चूडाविधुज्योतिषानत्पच्छाकरघंटिकाघणाघणारावैःश्रवः ११८

पूर्यते ॥ संमर्द्दोपनमत्स्कूपर्वभ्रकुटीकोटीरवाटीरसाबुद्दंडप्रमथौघदं
उपटलीसाटोपमाटीकृते ॥ ततः प्रविशति सांबशिवः ॥२॥ प्रियेसिध्
संकल्पा भवती ॥ यद्दयमुपनतएवज्रीवस्पविद्या विवाहोत्सवः ॥ देवी ॥ 120
नाथ भवदनुग्रहः किंन समग्रयिष्यति ॥ सर्वे सरभसमुत्थाय प्रणमंति
राजा ॥ चित्रशर्मणा सह सप्रश्रयमसकृत्प्रणम्योत्थाय भक्तिसमुत्ते जि
ताभिर्वाक्प्रवृत्तिभिरभिष्टौति ॥ जयजय विजयीभवापारसच्चिद्घनानं

दृप्तमल्लविद्यातमःसिंधुनिर्मग्नदीनोद्दिधीर्षोरसोपात्तकल्याणमूर्तेस
मस्ताभिनंद्याद्भुतोदाररचित्रापदानस्फुरच्चारुकीर्तेर्विखंडं विखंडंनिजा
न्येवसंज्ञानितश्चोमतःप्रीणितत्वद्दयालेशलब्धप्रभावाधिकस्तब्धवि
श्वकृज्जगन्मंडलीलुंठनाकुंठताचंडिमोद्दंडदोर्दंडकंडूलतागंतुकक्रीडि
तांहोलिकतत्रसच्चंडीककैलासतत्कूटकिंचित्पदांगुष्ठविन्यासपाताक
निर्मग्नतन्मूललग्नाखुवत्कंदद्दत्सांतरक्षःकुलाध्यक्षदाक्षिण्यभयःप्रव

१२१

त्तानुकंपाद्दवच्छिन्नवत्तेतिमाद्यद्भणोद्यच्चपेटाहतोच्चंडमार्तोंडगांडत्रुट

त्कीर्णदंतो घनक्ष्वत्रलोकीभवद्यत्नवास्फटु ता तिद्रुतानुद्रुतारोपसंक्षो

भतःसाध्वसध्वस्तधावत्पततत्क्रंददहंचधूरिब्रह्मशाकाहितत्तत्सदस्या १२१

मरश्रेणिकंगादशम्पाहषद्यपदंडाहतिप्रत्रुटत्स्निष्ठुरस्नुत्स्नुवादिछटा

पर्पटस्फोटवठ्ठापठापोद्वटं घोरटांकारिगंभीरकुंभीसहध्वस्तसर्पिर्घ

टोघस्तवद्भूरिसर्पिर्घनौघःसमिंधानविष्वक्निरंधानवैतानवन्ह्यर्चिरा

लीढशालापिनद्धस्फुटदृंष्ट्राठात्कारघोरार्भटीभ्रममनिर्वृत्तसंवर्तमध्युक्ष
तिस्तब्धदक्षाध्वरध्वंसवृद्धीरभद्रावताराररविंदाक्षवेधश्चिरान्विष्टनोद्द
121 ष्टसांद्रष्टिकव्याधपभ्वादिनिश्रेयसैश्वर्यविश्राणनस्पष्टदृष्टाकृते ॥
स्मरमदतिमिरोत्सुधामन्मिथोदर्पभ्रूपिष्टदेवासुरव्रातसंक्षुभ्यमाणाब्धि
गर्भोद्भवव्याप्तविध्यांडचंडज्वलज्ज्वालजालावलीढाखिलाशामुखाकाल १२१
कालानलत्कान्तहालाहलार्चिःपरिमुष्टसान्द्रकोलाहलोद्घुष्टवेधोहरिप्र

ष्टनष्टत्रिलोकीसमुज्जीवनायाद्भुतन्नियहारब्धनिर्यत्नजंबूफलग्रास
लीलायितव्यंजितापारमाहात्म्यभूमाद्भुतांभोनिधेदेवसाहंतमावेध
सोविष्टपाद्राचपाताळतःक्षिप्रमेताजगन्मंडलीःखंडडिंडीरपिंडानिवा
वर्तकोटौसमाघूर्णयंयेतिदर्पोद्दनल्पार्भटीघोरमाविर्भवंत्यभ्रकल्लो 122
लिनीनाथयुष्मज्जटामंडलेक्वापिनीवारभ्रूकायसंसक्तनीहारलेशः
किलालक्ष्यतेपामरास्त्वाममेयप्रभावोच्छ्रितंप्राकृतैर्दैवतैरेकवन्मन्व

तेहोभवान्नामविश्रायानेकोपिचिंतामणिर्नामसंतानकोनामहंताति
फल्गुप्रबोधानुरूपातिमूढस्तृतिप्रक्रियासेयमत्यद्भुतेविश्वविद्योतनो
द्दामतेजोनिधौभास्करेकीटखद्योततारोपवद्भातिमेकल्पकप्रष्ठताहृग्वि
भूम्सुल्कदानेककोद्यासहावेक्षणानक्षणेनैवलोकाननेकान्विधायप्रणम्या
प्रणुत्याप्रपत्यापिवाजातुयस्मेमतस्मस्पलत्वाम्प्यविश्वाणनंतेकियच्चंद्रच १२२
ड्रामणे।। ।।सकलविबुधदुर्ज्ञेयैतज्ज्ञयेन्नातुकेनापिरूपेणाविंचिद्यज्ञोहं

123

ल भेये तिलोभाक्तांगं तदंगं शारःस्ततदित्यादिय लिं. चिदायो धनांगत्वमाल्वंथा
सन्नप्रहृष्टेष्टविश्वं भरापुष्पवन्तौ रिवे धःपुरोगे पुजाग्रस्तुदेवेषु नैशल
रो चिस्स नाथेनमंदस्मितेनैवतिस्रःपुरो भस्मसात्कृत्यदैत्यान्विनिर्जित्य हृष्टा
नमस्तान्नृपभक्त्या विषष्णुपभ्नानां पतित्वेन शम्भुन्नमःस्वाम्यतः संभता पार
विश्वाधि पत्योन्नते सन्निवृष्टं निजस्यायुषोंतं दिदित्वा विपद्दिघ्नतःप्राज्ञ
स्रडिस्य वपूजासमाप्याशायारब्धपूजेम कंडोस्तनजेलुठत्स्वयत्नोदेन्यकार
ण्यभ यिष्ठमाक्रं दनैबंधुषुस्वाधिकारावलेपेन काठेथ कालेतमाकर्षति

१२३

क्रोधतो वामपाशाभिहत्यास विध्वंसितो मेष विध्वंसमेतत्त्रहारप्रणादो
भवद्भक्तवात्सल्पकीर्तेर्दिगंतप्रयाणोचितप्रोज्ज्वल घंट्रठात्कारितो नाममते
123 नांतकः सर्वतो यापि साशंकमाहिंडते त्वत्समो भक्तवात्सल्यसिंधुर्नकश्चि
न्नभूतो न भावी च किं भूयसा जल्पितेन त्वमेकोसि सत्यस्वरूपस्त्वदन्यत्स्व
येवाखिलं सत्त्वमत्युत्कटार्कोदितेजस्त्रयी कोटिकोट्यापि नाभास्यसे भास्य १२३
ते मानसिंधो भवज्ज्ञानलेशो न कृत्स्नं जगल्लिंचलिप्सापरं वल्गु भाहूल्लुभं

वस्तुनत्वत्परंकिंचिद्दिष्टंभवेदात्मकामायसर्वंयतोवस्तुसत्यंत्वमेव
प्रकाशस्त्वमेवप्रियंचत्वमेवासितादृक्त्वमात्मापुरःपृष्ठतःपार्श्वतोमृतस
ज्ञाविकालेषुवासर्वतःसर्वदावर्तसेहंततिष्ठन्निधावेवकार्पण्यभाङ्मं १२८
दभागीवतत्त्वामनन्यापरोक्षातिनेदिष्टमारादपश्यन्नविद्येंद्रजालप्रस
तेनिमज्जामिसंसारमिथ्यार्णवे॥ ॥निगमशिखरिकूटकोटिसंदो
हित्वराप्राकृतोद्दामतेजोनिधेसच्चिदानंदमूर्तेजगत्सर्गरक्षोपसंहारधौ

रेयताडीहकादिस्फुरद्धातचक्रातिवेगाभ्रमद्भूरितेजस्त्वयद्योतिनानावि
धेतज्जगन्मंडलोन्मीलनद्योतविध्वंसनध्वांतशांभवत्परावर्तनालातच
क्रक्रमालोकलीलाविनोदितप्रमाणौघसिद्धस्वसत्तासमस्ताक्षसांहत्यक
स्वाप्तिकृत्यावहारादिनानार्थजालेंद्रजालोदयावस्थितिध्वंसनानामधिष्ठा
नतत्तत्त्वसर्वत्रसत्त्वात्मनाधिष्ठितापारनैकप्रकारोन्मिषत्क्लेशभयिष्ठज
न्मादिकन्मोहगाढांधकारोघनिश्शेषविध्वंसनोच्चंडमध्याह्नमार्तंडस

साररोगात्रसक्षुन्नयोगींद्रसंसन्मनोमंथनिर्मथ्यमानश्रुतिव्रातदुग्धाब्धि
सिध्यत्सदानंदचिच्चंद्रिकासांद्रतत्पूर्णचंद्रोदयाद्वैतसाम्राज्यसिंहासनाध्य
क्षमन्नाथकेनापिमत्संततिस्पायसाश्रेयसामामकप्राक्तजन्तुःकोटिको
ट्यार्ज्जितेनापिपुण्येनदृष्टोसिदिष्ट्यानमामुद्धदीनंत्वदन्यःशरण्योन
मेपामरस्याधुनात्वामपिप्राप्यतीर्णोनिचेत्स्यामहंमेपराकागतिर्हीनबं
धोदयापारसिंधोभवांभोधिनिस्सारघोरंधरीकर्णधारातिदुर्वारतापत्र

यस्मुष्टसंजीवनोद्गारधाराधरानादिमोहांध्यनष्टामितःस्वार्थमाहृत्य हगा

नंदृनानंदसिध्दांजनात्मन्नमस्तेसमस्तेश्वरायाप्रधृष्योजसेतेजसांतेजसे

श्रेयसांश्रेयसेप्रेयसांप्रेयसेश्श्रेयसांश्रेयसे॥ ॥सांबशिवः॥ वत्सेकि

मितोविलंब्यते॥शिव॥नाथसर्वेवयमितःप्रस्थिताःएवकल्याणमंट

पाधिगमाय॥तंडुः॥इतइतोहेवः॥सर्वेकल्याणमंटपगमनंनाटयंति

शिव॥हंतमहासार्थगमनमहोत्साहेनाविदितविप्रकर्षःपद्मांतरवद्वं

अ सैव महानतीतः पंथाः ॥ पुरो विलोक्य ॥ शुकादिनानाद्विजघोषपो
षितं फलोपनम्रागममंडलोज्वलं ॥ समाधिनामस्फुरदंतरातपंप्रस
न्नमुद्यानमिदं महेशितुः ॥ यावदेतदुपसराम इति कल्याणमंटपम १२६
धिगम्य यथोचितमुपविशंति ॥ शिव ॥ वत्स भद्रपीठमिदमासनपरि
ग्रहेणालंक्रियतां ॥ राजा ॥ तथा करोति ॥ देवः ॥ प्रस्तूयतामनंतरकरणी
यं ॥ नेपथ्ये ॥ कोपायस्यजगंस्यमू निजलधेडिंडीरजालोपमंजन्मस्थेम

ल्यान् भजंति स हरिब्रह्मादिमर्त्यो पि सन्॥ लोकस्यानुजिघृक्षया
ध तव पुः शक्त्यास्वयानन्ययासश्लिष्टो जगदंबया पशुपतिः कुर्वी
तवोमंगलं॥ शिव॥ श्रुत्वा सहर्षे॥ इदं प्रसाद नाम्नो निदिध्यासन
महाराज पुरोहितस्य सुलग्नसान्निध्यसूचनमाशीर्वचनं॥ पुनर्नैप
थ्ये॥ इयंनलभ्यातपसा न धर्मैर्नमिधया नापि बहुश्रुतेन॥ शिवप्र
साद नलवोपनम्राविद्या तदेनां भज सावधानः॥ शिव॥ श्रुत्वा सह

126

र्षोल्लासं ॥ सन्निहितो मुहूर्तः प्रवर्ततामालोच्यं ॥ राजा ॥ यद्गर्भजठरं
हरेरिव जगत्सध्यासते ऋग्यजुःसामान्यक्षरमेतद्धोमिति परब्रह्मा
भिधानं परं ॥ एतद्रूपतया निरंतरमितस्तौर्यत्रिकोदंचितेनादब्र १२८
ह्मणि पूर्वरंगविधया वत्स्वं जगल्लीयते ॥ ततो निदिध्यासनमहा
राजःसह विद्यया प्रविश्य ॥ रहिताराति वित्स्या राजन्न हसीय संत
त्या ॥ भव परमानंद घनो भवसागरपार विश्रांतः ॥ इति विद्यांजीव

परिणय

राज्ञायमप्रयच्छति ॥ जीव ॥ विद्यां पाणौ गृहीत्वा ॥ सपरितोषं ॥ दृष्टिर्ममा

सि हृदयितेसुहृत्तालिरेकाद्विष्ट्याधुनासि मिषिता मुषिता विमोहाः ॥ सु

प्तप्रबुद्धइवसुभ्रुतवप्रसादाद्द्रात्मा किलायमहमित्यवधारयामि ॥

विद्या ॥ ग्रस्तं विमुक्तमिव शारदचंद्रबिंबं शापावलीढमिवशैवमुक्ति

तंचरत्नं ॥ भयःप्रपद्यपुरुषोत्तमवल्लभं त्वामात्मानमस्मिसुहितापप

रिपूरितेव ॥ चित्तशर्मा ॥ पुरो विलोक्य ॥ सविस्मयं राजानं प्रति ॥ अ १२८

होपारे गिरामसुष्याः प्रभावः॥ यदधुना॥ शतकोटिकोटिजनन्नेषु भूरिशः सुखदुःखभोगपरिपाकसाधनं॥ यद्द विद्यया ति चिरकाल संचितं तदीयं प्रदीपयति कर्मबल्वजं॥ तदिदमवलोक्य नितांत 128

परिक्लिष्टा यथागतमविद्यासपरिवारा पराववृत्य गच्छति॥ राज्ञा॥ विलोक्य॥ सहर्षं॥ चित्तशर्माणं प्रति॥ त्वयेदं निर्व्यूढं ननु परममी दृश्यमसुखं ब्रुवे किं ब्रुवे किं भवतु चिंतमेवं व्यवसितं॥ अविद्यारात्मा

हंभवद्दनितरोद्यस्मि सुचिरादितो विद्याशक्त्यामद्दनितरभक्तोभव सु
खी।। परतोनिर्दिश्य।। सप्रश्रयं।। विवेकाद्या एते विरतिरियमेषावि
विदिषानिवृत्तिःसा सर्वैरनितरलयासाधितमिदं।। अहंकश्चित्तेके
च्चिदितिसत्तिभेदेहखलुमिथोभवेहायस्तानामुचितमुपचारोक्तिरच
ना।। शिवभक्तिं प्रणाम्य सविनयादरं।। क्वाहं मोहमहांधकारजलधौग
टंनिमग्नश्चिरादीदृक्‌कृत्वाश्वतचित्सुखाव्यवहिताक्वेयंभवत्संगतिः १२८

मन्ये विश्वगुरोर्महेश्वरमकुटालंकारमालायिता गंगा कीकटकीटतापशमनी जाता किमन्यत् ब्रुवे ॥ ततः स हैव भक्त्या सांबशिवमुपसृत्य ॥ दुग्धार्णवे दुग्धलवः प्रविष्टो यथा तथाहं त्वमभवमेव ॥ भेदावभासेन तथापि किंचिद्धीपाधिकेन प्रणमाम्यहं त्वां ॥ प्रणम्योपाय बद्धांजलिः शिवं प्रति ॥ विलीयस्वाविद्याघनय वनिकायामथ वहन्विचित्रं नैपथ्यं नटसि शिव नानात्मकतया ॥ स्वयं जायत्यभ्यस्यपि च परमानंद

मरितोजयत्यस्याश्चर्यंजगद्दितिभवन्नाटकमिदं॥शिव॥परमेश्व
रीप्रति॥भगवतिनिरुपाधिकृपाभवदनुकंपयातदेवमयंकृतार्थोजी
वराजः॥देवी॥सप्रसादस्मितं॥वत्सकिंतेभूयःप्रियमुपहरामि॥
जीवः॥अंबकिमितोपिपरमवशिष्यते॥तथापीदमस्तुभरतवाक्यं
अस्तुस्वस्तिजगत्त्रयायजगतीरक्षंतुभूमीभुजोधर्म्येणैवपथाभवं १२९
तुसुखिनःसर्वेपिगोब्राह्मणाः॥पर्जन्यान्लमखक्रमेणजगतश्चक्रंतदा

वर्त्ततांविद्वांसोविजयीभवंतुभगवद्भक्त्याजयीवर्धतां॥ ॥इति
निष्क्रांताःसर्वे॥श्री॥ ॥सप्तमोंकः॥ ॥श्रीमत्तुंजयार्प
णमस्तु॥ ॥श्री॥ग्रंथः१२९०॥श्री॥ ॥श्री॥

विद्यापरिण
यननाटक

१३०

130